CC-0. Digitized by eGangotri and MIDF- Delhi

महेन्द्र-संस्कृत-विश्वविद्यालयस्य तृतीयं प्रकाशनम्

रामराज्यम्

पूर्णप्रसादः 'ब्राह्मणः'

महेन्द्र-संस्कृत-विश्वविद्यालयः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महेन्द्र-संस्कृत-विश्वविद्यालयस्य तृतीयं प्रकाशनम्

रामराज्यम्

(खण्डकाव्यम्)

प्रणेता

पूर्णप्रसादः 'ब्राह्मणः'

प्रकाशक :

महेन्द्र-संस्कृत-विश्वविद्यालयः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशकः
महेन्द्र-संस्कृत-विश्वविद्यालयः

प्रथमं सस्करणम्- ५००

प्रकाशनकालः :-विश्वविद्यालयदिवसः (आषाढकृष्णदशमी), २०४६

सर्वेऽधिकाराः प्रकाशकाधीनाः

मूल्यम् :- २५।-

मुद्रकः :- महेन्द्र-संस्कृत-विश्वविद्यालय-मुद्रणालयः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ससर्वाधिकारम्

समर्पणम्

अस्मच्चिराकाङ्क्षामूर्तरूपाय महेन्द्र-संस्कृत-
विश्वविद्यालयाय सश्रद्धम् सविनयं
समर्पयेऽहमिदं रामराज्यखण्ड-
काव्यम् ससर्वाधिकारम्

—लेखकः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशकीयम्

नैपालकाधुनिकसाहित्येतिहासे कुलचन्द्र – सोमनाथ – दधिराम – पूर्णप्रसादादयः केचन विलक्षणधिषणा विचक्षणाः सुरगिरा राष्ट्रगिरा च साहित्यसाधनामकार्षुः। यद्यपि पूर्णप्रसादे उपर्चाचितेष्वन्यकविषु इव शास्त्रीयं प्रगाढचिन्तनं नोपलभ्यते, तथापि स्वकालभवगतिशील – राजनीतिक – जीवनाश्रितवस्तुतथ्याभिव्यक्तौ अयमन्याननतिशेते।

स्वर्गीयः पूर्णप्रसादब्राह्मणः राष्ट्रभाषायामाख्यानसाहित्ये प्रायो लघुकथासु स्वानुभूत - सामाजिकजीवनस्य विशेषतो निर्धननेपालीयानां दुरवस्थायाः मर्मस्पर्शि चित्रणमकार्षीत्। अनेन नेपालीयभाषायां निबद्धे 'एक कथा' नामकलघूपन्यासे (२०४०) तात्कालिकशासनपद्धतेः वास्तविकस्वरूपेण सह तद्भाविदुष्परिणामसंभावना च सम्यक् प्रत्यङ्किततेति राजनीतिकसाहित्यकारोऽयमिति नतिरोहितं प्रेक्षावताम्।

स्वर्गीयब्राह्मणेन रचितानि त्रिचतुराणि संस्कृतप्रबन्धकाव्यानि राजनीतिमाश्रितानि। तेषु अन्तिममिदं 'रामराज्यम्' (२०४३) अनुष्टुप्छन्दसि पञ्चसु सर्गेषु निबद्धं मौलिकं खण्डकाव्यम्। अस्य रचनायाम् अलङ्कारप्रयोग – रससमावेशादिवैलक्षण्येन कलापक्षं समुज्ज्वलय्य चमत्कारप्रदर्शनं नाभीष्टम्, परन्तु सरलमधुरगिरा राज्यव्यवस्थायाः सौरूप्य-वैरूप्य-विश्लेषणमेवैषणीयं कवेर्दृश्यते। प्राचीनमार्षमितिवृत्तमवलम्ब्य निबद्धेऽप्यस्मिन् काव्ये स्वकालभवराजनीतिकप्रणाल्याः साङ्गत्य–वैसङ्गत्य – गवेषणायां कविश्चञ्चूर्यते। आदर्शमानवं दाशरथिं चरितनायकमभ्युपेत्य कविर्मार्गयति – रामराज्यादर्शे स्थापनीयं नेपालराज्यं लवणासुरराज्यायितं माभूत्, भूभारहररामवत् प्रतिष्ठाप्यो भूपालः दशकन्धरसरणिं मा निनीषि। अधिनायकवादे राष्ट्र – राष्ट्रियतादिडिण्डिमघोषः कदापि साफल्यं न यातीति कविरभिप्रैति —

> "प्रजाः सेव्याः प्रजाः स्नेह्याः, को राष्ट्रः प्रजया विना,।
> ततः प्रजैव हि सर्वस्वं, राष्ट्रस्येति विभावय। (२/५६) ॥"

किञ्च नैसर्गिक – मौलिकाधिकारवञ्चिता जनाः पशूयन्ते इति कविहृदयं दोदूयते —

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(ख)

ारेण, जनान् राज्ये प्रवञ्चयन् ।
न्च, भेदानपनिनोषति ।। (३/३०)"

सह साधोयान् सम्पर्को भवतु, न पुनस्तादृक्
विघात्य: इति कविराशेते —

दि, श्रोतव्यं भूभुजा स्वयम्, ।
दुर्दर्शेन प्रजाजनै; ।। (४ ४६)"

बन्दीकरणं तेषां वाक्प्रकाशनादिस्वातन्त्र्या-

पे बन्दीकृता वयम्, ।
ग्तु भाषितु क्षमा: ।। (३/३७)"

राष्ट्राध्यक्षं परित: स्थिता: स्वार्थपरा:
ति कविश्चित्रीयते —

ा एव संस्थिता: ।
महो ध्वनि: ।। (३/३१)"

तप्रजातन्त्रमनुसृत्य विकासपथं जिग-
नां कृते आर्षीमादर्शराज्यमर्यादाम-
नमेतस्य समीचीनं मन्यामहे ।२०४६
द् अवरुद्धप्रकाशनमिदं काव्यं सम्प्रति
ा: सर्वे सहयोगिनो धन्यवादार्हा: ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मंगलाचरणम्

तर्कोर्मिमद्धर्मकर्मदर्शनागाधसिन्धुषु
असंख्यासंख्यसंख्यावज्जनविश्रुतनामसु
प्राप्तश्रेष्ठगुरूपाधिवैशिष्ट्यालङ्कृतात्मसु
मत्पूजनीयगुरुषु श्रीजुनानाथशर्मसु
कृतभक्तिप्रणामोऽहं रामराज्यप्रकाशिनीम्
पुस्तिकां प्रणयाम्येतां विश्वक्षेमविवर्धिनीम्

पूर्णप्रसादः 'ब्राह्मणः'

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्री रामभक्तेषु नमस्कारार्पणम्

काश्यां तारकमन्त्रेण जीवानां मुक्तिदायिने
रामप्रथमभक्ताय विश्वनाथाय मे नमः
विदार्य वक्षो यः सीताम् राममूर्तिमदर्शयत्
रामस्याऽनन्यभक्ताय तस्मै मारुतये नमः
निर्गताऽऽदौ काव्यमयी पुण्या रामकथा यतः
कवीनामादिगुरवे तस्मै वाल्मीकये नमः
गीतेन लोकभाषायाः रामं सर्वत्र सुस्मरम्
कुर्वते भक्तराजाय तुलसीयोगिने नमः
आदर्शरामभक्ताय गीताधर्माय ऋषिणे
महात्मने गान्धये च विश्ववन्द्याय मे नमः
रामस्य नाम्ना कृत्या वा प्राप्तप्रभुकृपा भुवि
येऽप्यन्ये स्युर्महात्मानः सद्भ्यस्तेभ्यश्च मे नमः !

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किञ्चिद् वक्तव्यम्

ऐतिहासिक एव रामोऽत्र काव्ये मयोपश्लोकितो न भगवान् रामः । मन्ये न साधु विहितम् भगवद्भावेन रामं परिचाययद्भिर्वर्णयद्भिर्वाल्मीकिव्यासादिभिरपि । यतो रामस्य तथा भगवद्भावे कृत आक्षेपो वृथैव भवति दास्यां मन्थरायाम्, महाराज्ञ्याम् कैकेय्याम् तथा राक्षसनायके दशकन्धरेऽन्येषु रक्षःसु वा । अघटितघटनापटीयसः सकलशक्ति सामर्थ्यभाजः सर्वान्तर्यामिनो रामस्य किमीयं मन उद्यच्छेत् स्तोकमपि विप्रियं कर्तुम् ? यतः स एवाऽस्ति विनेताऽपि स्वाम्यपि दुश्चरितानां सुचरितानां वा जनानां, तत्संकल्पविकल्पकारणानां समनसां सकलेन्द्रियाणाम् तथा सकलभौतिकविश्वैककारणभूतायास्त्रिगुणात्मिकायाः प्रकृत्यपरनाम्न्या मायायाश्च । तेन तथा सर्वशवत्यैश्वर्यसेवितस्य भगवत्तावतो रामस्य पुरतोऽलमेतान् वराकान् अकिञ्चित्क्षमतावत आक्षिप्याऽन्यथा संभाव्य च ।

दाशरथे रामस्य भगवत्ता प्रचारेण कियतां वा जनानाम् भौतिकसंसारे उपाकरोत् प्रोत्साहयितुमपारयच्च तैस्तैः कृतः सबृहन् रामायणग्रन्थनिवन्धसङ्घातोऽपि ? किमेतेन जनानां रामादर्शप्रशिक्षणं क्वचित् सम्भवति ? तर्हि पङ्गुर्महोच्चपर्वतलङ्घनायेव नानागार्हस्थ्यप्रपञ्चानलदाहरपाङ्गा जना रामस्योच्चादर्शानुकरणाय प्रोत्साह्यन्ते ? तत् कुतोऽपि नोपपद्यते भगवद्भावमारोपितस्य रामस्य चरितवर्णनं भौतिकादर्शाय । एष एव दुष्प्रकारो रामचरित्रवर्णनस्य, यो नाऽशक्नोदद्यावध्यपि जनानां हृदयेषु रामस्य तमादर्शम् अङ्कयितुं, येन लोकव्यवहारेऽपि कस्यचित् पितुः सत्यसन्धतासंरक्षणाय रामस्येव तत्पुत्रस्याऽधुनिकस्य राज्यलोभत्यागात्मकः आदर्शः क्वचिद् द्रष्टुं श्रोतुं वा शक्येत !

तेन रमन्ते योगिनो यस्मिन्, कीर्तयन्ति च साम्रेडम् यत्पुण्यं नाम औपनिषदिकामन्त्रा अपि – 'हरे राम हरे राम राम राम हरे हरे !' इति, स परमात्मा रामस्तु भक्तानां हृदयाऽभ्यन्तरे एव निवसति, न भ्रमप्रमादलोभादिदोषदूषिते ईदृशे काव्येऽवतरति मादृशानामन्यादृशानां वा । ममाऽस्मिन् काव्ये तु राज्ञो दशरथस्य प्रासादे, महाराज्ञ्याः कोशल्याया

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गर्भतो ऽन्यदेशीयराजकुमारवदेव जातः, जानुचलनयोग्यायां शैशवावस्थायाम् इतस्ततो निकटे पतन्तमुत्पतन्तं च (काकभुशुण्डीम्) काकं प्रेक्ष्य प्रासादप्राङ्गणे सप्रहर्षं सस्मितं च तम् (काकम्) उपसर्पन्, भ्रातृभिः क्रीडन्, रिङ्गन्, खाद्यं कवलयंश्च पुनः पुनस्तमेव काकमुपसर्पन् विहसन्, एवं बाललीलया पितरौ आमोदयन्, ततो गते च काले वयस्कतामप्यप्राप्यैव त्रिलोकविजयिभिरपि पौलस्त्यादिभिः दुरुत्तोलं शैवं धनुरुत्तोल्य तद् भङ्क्त्वा च कन्यातलल्जम् सीतामुद्वहन्, ततश्च क्रमशस्तदातनविश्वस्य कण्टकायितान् यातुधानान् स्वीयवीर्यातिशयेन निर्मक्षिकीकृत्य विश्वस्यैव कृते नल्पं तर्पणं प्रीणनं च सार्वभौमं स्नेहवात्सल्यमहितं सौराज्यं प्रकुर्वन् वीरशिरोमणिः सार्वभौमो राजा रामोऽस्ति यो मानवोऽपि सन् स्ववीर्यप्रतापातिशयेन, विश्वजनीनेन महीयसा सज्यादर्शेन च मनुष्यसंख्यामत्यवर्तत । तस्यैव रामस्य वैयक्तिकचरित्रस्य, राष्ट्रियनीतेर्विश्वभावनायाश्चाऽनुकरणाय काव्यशैल्याऽहं लोकाननुरुन्धन्नस्मि । यतस्तस्य रामस्य सतात्पर्यायाः कथाया यावत् सार्वभौमः प्रचारो नो विधीयेत, तद्गुणास्तच्चरित्राणि च यावन्नानुक्रियेरन्, तावत् विश्वस्य समाजसमाजेषु, राष्ट्रराष्ट्रेषु, व्यक्तिव्यक्तिषु च मिथो रागद्वेषाः, युद्धसंघर्षाः, हिंसाप्रतिहिंसाश्च नो विरंस्यन्ति, सद्भिः साधुभिर्मनीषिभिश्च चिराकाङ्क्षिता विश्वशान्तिरपि नैव जात्वपि सन्निधास्यते, सेत्स्यति चेति निश्चप्रचमेतत् । तस्माद्वर्तमानविश्वस्योत्तरोत्तरं वरीवृध्यमानामेतामतिविषयां स्थितिमनुलोमयितु विश्वजनीनानां विश्वात्म भावनानाम् सक्रियं प्रातिनिध्यं प्रकुर्वताम् रामराज्यादर्शानां कार्यान्वितेरेवाऽस्ति सांप्रतमावश्यकता, नो वैज्ञानिकानांनवनवानां चमत्कारिणामपि आविष्काराणामनात्मभावानां, तदुन्नतिप्रगतीनां च विहिंसकस्वार्थसीमापर्यवसितानाम् ।

किञ्च– विज्ञाय अविज्ञाय वा विश्वमेव तोष्टूयते रामराज्यम्, यत्र तत्र प्रसङ्गे तदुदाहरति च । परं दुर्भाग्यतोऽद्ययावदपि नाऽहमुपलब्धवान् क्वचिद्रामराज्यविवृतिम् – "ईदृक्षमेवाऽसीत् रामराज्यमिति" । नचाऽहमपि वृथाऽऽत्मनः परिहास्यत्वाय अतिवच्मि– "अस्मिन् काव्ये राम-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राज्यमहं यथातथं चित्रितवानिति" । परं तथात्वेऽपि रामराज्यवर्णनव्यपदेशेनैव ममैतत्काव्यम् पाठकानां हृदयेषु राष्ट्रस्य, समाजस्य, विश्वस्यैव च कृते योगदानाय कामपि सात्विकीं चेतनामुद्भावयितुं शक्नुयादेवेति यदहमाशासे तदेव हि स्यात् फलम् यथार्थतश्चित्रितस्याऽपि रामराज्यस्येति सत्यं मोमुद्यते मामकीनं चेतः, न च संमिमीते मम हृदये प्रहर्षः । रामराज्यवर्णनकर्म आनुषङ्गिकीयमुपलब्धिर्मम । यामहमात्मनो गौणं लक्ष्यं मन्ये । मम प्रधानं लक्ष्यं तु तदेवाऽस्ति यदहमस्य प्रस्तावनायाम् दर्शयिष्यन्नस्मि— "स्थितप्रज्ञमार्गेण तमसो ज्योतिर्जिगमिषोर्मम साहाय्यायाऽनेन रामराज्यप्रदर्शनेनाऽत्मनो मनः सबलं, सधैर्यम्, शान्तम्, एकाग्रम्, पवित्रं च भवतादिति । तेनैव तदात्मनो मनो रामराज्यस्य, रामकथायाः रामादर्शस्य च पर्याधाराभ्यन्तरे एव बलवत् निरुध्यमानं यथाशक्ति नियन्त्रितचापल्यं चाऽस्ति मया । जयतु संस्कृतम् ।

०००

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रस्तावना

हे काम, हे क्रोध, लोभ! स्थ यूयं सहजाः प्रियाः
युष्माकं विरहं सोढुं देहो मे नैव वाञ्छति
तथात्वेऽपि त्यजन् वोऽस्मि, व्रजन्नस्मि च तं परम्
रमन्ते योगिनो यस्मिन् त्यक्तविश्वविभूतयः
नीरवो मधुसन्देश आह्वयन्नस्ति दूरतः
नीरूपो मधुरश्मिश्च ह्याकर्षन्नस्ति मां वलात्
पारेजगन्मधुमयेऽनश्वरे नित्यभाश्वरे
क्वचिद् दूरे स्वर्णदेशे प्राप्तव्यं मेऽस्ति सत्वरम्
हे मुक्तिप्रतिबन्धा! मेऽस्त्यमृतत्वाय लालसा
मार्गं प्रदत्त तमसो ज्योतिर्जिगमिषोर्मम !
तस्मिन्ननन्त आलोके आनन्दे चाऽक्षरे कथम्
केनाऽध्वना वा गन्तव्यम् ? इति व्याकुलतां दधत्
नैराश्यं मा भज मनः! तत् साफल्यं हनिष्यति
आशैव नो जीवनं यत् आशैव द्वारमुन्नतेः
अथवाऽस्मिन् क्लेशमये दाहके वायुमण्डले
शान्तिं न विन्दसि, स्थैर्यं चाऽपि नो लभसे यदि
तत् सर्वप्रथमं कर्तुमनुकूलाम् निजस्थितिम्
किञ्चित् युगान्तरं गच्छ त्यक्त्वेमं समलं कलिम्
यत्राऽस्ति रुचिरं पुण्यमुदारं वायुमण्डलम्
विस्मरत् क्लेशमत्रत्यं रमेथास्त्वं सुनिर्भरम्
त्रेताऽस्ति युगमीदृक्षम् ! तदैतिह्यकपाटके
उद्घाटिते त्वं वीक्षेथा अपूर्वं रामणीयकम्
तत्र कश्चिदमर्त्यात्मा चरितैर्जगतो हितैः
अमरं कञ्चिदादर्शम् अस्ति लोकान् प्रदर्शयत्
तस्मिन् दृष्टे हे मनो मत्साहाय्यात् त्वदीप्सिताम्
निर्वृतिं, स्थिरतां, शान्तिं च लभेथा निरन्तरम
प्रेक्षस्वोद्घाटयन्नस्मि त्रेताम्, यत्र स एव हि
राजा भूत्वा स्वप्रजार्थे चिन्तयन्नस्ति निर्भरम्!

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रथमः सर्गः

तेषु तेषु च राज्येषु
कथङ्कारं प्रजाः स्थिताः ?
मत्प्रभावा अपि प्रायो
भोगिनः सन्ति भूभुजः ।

॥१॥

प्रजानां विषये तेऽपि
भूयास्तत्कर्मचारिभिः
मृषा विवृत्या प्रायेण
संभवन्ति प्रतारिताः ।

॥२॥

तत् कञ्चित् समयं यावत्
तत्र तत्र प्रजाजनैः
साक्षाद् विहितसंपर्कः
स्वयं पश्यामि तत्स्थितिम् ।

॥३॥

एवं चिन्तयमानं तम्
रामं राज्ञां शिरोमणिम्
उपेत्य मंत्रिप्रवरः
प्रोचे प्रणतिपूर्वकम्- ।

॥४॥

"प्रजास्नेहाज् जनपदान्
राज्यानि च यियासुना
प्रभुणा सैष सप्ताहो
यात्राऽऽरम्भाय निश्चितः ।

॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किन्त्वद्य सूचनाऽऽयाता–
"मुनयो गौतमादयः
क्षिप्रमत्राऽगमिष्यन्ति
प्रभुदर्शनकाम्यया ।

॥६॥

तद् यात्रा तत्प्रतीक्षा वा
कोऽस्मत्कार्यक्रमो भवेत् ?
निर्धार्योऽद्यैव सञ्जायै
संभारस्योचितस्य नः" ।

॥७॥

आकर्ण्य मन्त्रिणः प्रश्नम्
प्राज्ञो नीतिविचक्षणः
राजाधिराजः श्रीरामः
प्रोवाच समयोचितम्– ।

॥८॥

"अहो किमाप्यं सञ्जातम्
मुनीनां पुण्यदर्शनम् ?
तर्ह्यस्मदीया सा यात्रा
ऽपसार्यैव ससूचनम् ।

॥९॥

क्व श्लाघ्यं दर्शनं तेषाम्
फलितं पुण्यकर्मणाम्
स्थगिताऽपि पुनः साध्या
क्व च यात्राऽस्मदीहिता! ।

॥१०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तपोनिर्धूतपापानाम्
वीक्ष्य येषां मुखद्युतिम्
नृणां प्रयात्यैहिकता-
प्रेक्षिणी दृक् सदा त्रपाम् ।

॥११॥

असकृत् ताण्डवं नृत्यम्
कुर्वन्तौ जनमानसे
रागद्वेषौ निलीयेते
यान् वीक्ष्यैव विभीतवत् ।

॥१२॥

तमोऽपहे चन्द्र इव
यस्मिन् दृष्टे मुनिव्रजे
सिन्धूर्मिवद् वरीवर्धि
त्यागभावो नृणां हृदि ।

॥१३॥

तपसा सूर्यवद् दीप्त-
त्विषां तेषां समागतम्
नवं प्रसोष्यते कञ्चिज्-
ज्ञानालोकं तमोऽपहम् ।

॥१४॥

संमन्यन्ते देशिकत्वात्
अस्मत्सेव्या विशोऽपि यान्
तेऽनूचाना हि हि ऋषयः
संमान्याः सर्वथैव नः ।

॥१५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तपोनिर्धूतपाप्मानः
सर्वज्ञा विश्वबन्धवः
अतिमर्त्याः क्रान्तदृशो
जयन्त्येव महर्षयः ।

॥१६॥

तदाशु कतमद् धर्म्यम्
के के तत्राऽप्युपस्कराः
कानि कानि च पात्राणि
योज्यानि वसनानि च ।

॥१७॥

सौविध्यं तत् प्रदातव्यम्
येन तेषां तपोवनम्
स्मर्तव्यं नो भवेन्नित्य-
कर्मानुष्ठानहेतवे ।

॥१८॥

किं बहूक्तेन दिवसान्
यावतो निवसन्ति ते
तावतो भृत्यवर्गो न-
स्तत्सेवार्थे नियोज्यताम् ।

॥१९॥

'निवृत्तेष्वेव मुनिषु
प्रदर्श्येव हि पद्धतिम्
यात्राप्रसङ्गो भविता'
सम्यगेतत् प्रचार्यताम्" ।

॥२०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कार्यक्रमस्य विषये
निर्दिश्यैवं स्वमन्त्रिणः
नियते समये सौधम्
प्राविशद् भ्रातृभिर्नृपः ।
॥२१॥

मुनिव्रजे हि निकट-
मायास्यति मधाविव
अभूत्नृणां हि पिकवद्
वागारम्भः श्रुतिप्रियः ।
॥२२॥

उपस्थातुं मुनिगणम्
प्रक्षाल्याऽन्तरकल्मषम्
शरत्कालं नद्य इव
स्वच्छतां भेजिरे प्रजाः ।
॥२३॥

संसूचकेभ्योऽवगते
निकटे तापसागमे
यथानुशासनं प्रैष्यवर्गः
सत्क्रियताम् अगात् ।
॥२४॥

तेषां स्वागतसत्कारे
नैवाऽभून्न्यूनता क्वचित्
सा त्वासीत् सच्चिकीर्षूणाम्
आत्मतुष्टिषु केवलम् ।
॥२५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एतदव्यक्तमेवाऽऽसीत्–
तत्कृते ह्यधिकारिणाम्
अन्तः श्रद्धाऽधिकतरा–
ऽभूत् किं वा बाह्यसत्कृतिः ।
॥२६॥

प्रासादीये परिसरे
हर्म्ये वासाय कल्पिते
प्रापय्य तान् मुनीन् प्रोचु–
र्विनीताः कर्मचारिणः –
॥२७॥

"राज्ञ आज्ञाऽस्ति भो पूज्याः
मुनयः पुण्यदर्शनाः !
विश्रस्यताम् आस्यताम् च
हर्म्येऽत्र प्रैष्यसेविते ।
॥२८॥

उत्कण्ठया श्रद्धया च
बलादिव नियोजितः
राजा भवद्दर्शनाय
स्वयमत्राऽगमिष्यति" ।
॥२९॥

तदाकर्ण्यैव मुनयः
प्रोचुरेकस्वरेण तान्–
मैवं भवतु, युष्माभि–
र्विनाप्यः स नृपो द्रुतम् ।
॥३०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

"प्राप्तौ स्वजीवनेऽस्माभिः
राजानौ द्विविधाविह
एको हि भूभारभूतो–
ऽपरो भूभारहारकः ।
॥३१॥

तद् भूपापसदं हत्वा
भूभारं दशकन्धरम्
भूभार हारिणं भूपम्
वयं द्रष्टुमिहाऽगताः ।
॥३२॥

तद्दर्शनोत्तरं ह्येव
विश्रामोऽस्माकमर्हति
प्राग्विश्रामो भवतु नः
उत्कण्ठायास्ततस्तनोः" ।
॥३३॥

ततो राजा मुनीनां ताम्
आकांक्षाम् समपूरयत्
ते च तस्येति पक्षौ द्वा–
वेव तोषम् उपेयतुः ।
॥३४॥

अतोषयद् यथा राज्ञः
प्रियाः श्रद्धागिरो मुनीन्
न तथाऽर्घ्यादिविधयो
यथाशास्त्रं कृता अपि ।
॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ततो बद्धाञ्जली राजा
प्रोवाच मुनिसत्तमान्–
"अद्य मे सफलं जन्म!
बाढमस्मि प्रहर्षितः ।
॥३६॥

यतः स्थितेनाऽपि राज्ये–
ऽद्य यावज् जानता मया
नाऽपराद्धमिति स्पष्टम्
प्रमाणं भवदागमः ।
॥३७॥

संयुक्तो भवतां एवम्
आगमानुग्रहो यतः
सुप्रापो न भवेत् राज्ञाम्
धर्म न्याय-प्रजाद्विषाम् ।
॥३८॥

एतावतोऽनुग्रहस्य
स्रोतसः सर्वशर्मणाम्
तपोधनाः! कथमपा–
करवाणि ऋणं नु वः? ।
॥३९॥

कच्चिन्मदनुकम्पायै
केवलं भवदागमः ?
अथवाऽऽश्रमसंबन्धि
कार्यमप्यस्ति किञ्चन? ।
॥४०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इष्टेभ्य उत पूर्तेभ्यो
यद्यर्थेन प्रयोजनम्
पर्याप्तं गृह्यताम् रिक्थम्
अर्थिसाहाय्यकोषतः ।

॥४१॥

सेनार्थबुद्धितत्त्वेषु
राष्ट्रसंस्थानहेतुषु
प्राणायते बुद्धितत्त्वम्
यद् भवन्तोऽधिकुर्वते ।

॥४२॥

तत्प्राणभूतान् भवतः
को वा राष्ट्रो जिजीविषुः
अग्रपङ्क्तौ प्रतिष्ठाप्य
न समीहेत सेवितुम् ।

॥४३॥

सूर्यवंश्याः समे भूपाः
तपोधनवशंवदाः
आसन्नहं चाऽस्मि, तेन
ब्रूत मां करवाणि किम्? ।

॥४४॥

कर्तव्ये स्खलनं माऽभू-
न्महृामाशीः प्रदीयताम्
शक्नुयां राजकर्तव्यम्
स्मर्तुं, कर्तुम् अनारतम् ।

॥४५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अहं स्मर्तुं शक्नवानि
सन्ततं भोः तपोधनाः!
लोकाराधनमेव स्वं
व्रतं, ध्यानम्, उपासनम् ।

॥४६॥

तमेव मङ्गलं नीति–
निर्देशं प्राप्तवान्यहम्
येन राज्याय साफल्यं
पूर्वं राजर्षयो ययुः ।

॥४७॥

राज्ञस्तद् वचनं श्रुत्वा
श्रद्धाभक्तिसमन्वितम्
प्रत्यभाषन्त मुनय–
स्तं प्रहर्षमुपागताः –।

॥४८॥

"अहरस्त्वं महाराज !
भारं, तदधुना त्वयि
प्रसीदति समग्रा भूः
सशैलवनकानना ।

॥४९॥

अद्याऽस्मदाश्रमा, ग्रामाः,
राज्यानि, नगराणि च
निरीतयो निरातङ्का
नन्दन्ति, विकसन्ति च ।

॥५०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राजाधिराज! धरणीं
त्वयि शासति संप्रति
सर्वो लोकोऽनुभवति
शान्तिम्, ऋद्धिं, समुन्नतिम् ।
॥५१॥

उन्मिषन्त्यः सन्ति हृदि
नृणाम् उत्सर्गचेतनाः
निमीलन्त्यः सन्ति वित्त-
शोषसंग्रहभावनाः ।
॥५२॥

[१ग्रामे ग्रामे स्थितो देवो
देशे देशे स्थितो मखः
गेहे गेहे स्थितं द्रव्यं
धर्मश्चैव जने जने ।]

तत् तुष्टाः स्मो वयं राजन्!
लोकाभ्युदयहेतुना
यज्ञियेन पथा गच्छत्
तवैतत् प्राप्य शासनम् ।
॥५३॥

मर्मस्पृशः समुल्लेख्या
घटन्ते घटना अपि
अतिमर्त्यचरित्रस्य
वीरस्यैव हि जीवने ।
॥५४॥

१ उद्धृतोऽयं श्लोकः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यद् यादृशं भवेत् कर्म
दुर्निवारं हि तत्फलम्
तदापतेयुरपि ते
जीवने विविधाधयः ।

॥५५॥

सोढ्वैव तन्मेदिनीवद्
दृढीभूय हिमाद्रिवत्
समुद्रवच्च गम्भीरः
समर्यादश्च शाधि गाम् ।

॥५६॥

जनाधिकारसंपन्नम्
उदारं दृढनीतिकम्
सर्वेषां सुखसंवृद्ध्या
स्वाराज्यस्याऽवधीरकम् ।

॥५७॥

अपूर्वमादर्शभूतम्
तवेदं राज्यमुन्नतम्
निष्कण्टकमनासक्तं
चिराय प्रथतामिति ।

॥५८॥

स्नेहपूर्णाभिराशीर्भिः
साक्षात् त्वामभिनन्दितुम्
समागता वयं राजन्!
नाऽस्त्यन्यन्नः प्रयोजनम् ।

॥५९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्यागादर्शेन विश्वस्मिन्
निर्वैरं शान्तमुन्नतम्
समाजं निर्मिमासूनाम्
अस्माकं हि तपस्विनाम् ।
॥६०॥

कोऽर्थो धनेन प्राज्येन
तद् गत्वाऽस्मत्तपोवने
मा संक्रामयताद् राजन्!
एताम् नगरसंस्कृतिम् ।
॥६१॥

धर्मस्य राज्ञो राष्ट्रस्य
तथा विश्वस्य भूतये
नचाऽविलयतात्तन्न-
स्तां तपोवनसंस्कृतिम् ।
॥६२॥

इति प्रथमः सर्गः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वितीयः सर्गः

सत्यमाराजमारङ्कम्
आकीटमथवाऽऽद्विपम्
क्वचिद् धर्मः क्वचिच्छाया
ह्येतदेव हि जीवनम् !

॥१॥

चरत्सु स्वेन लक्ष्येण
तिर्यक्ष्विव जनेष्वपि
विधिव्याधस्य सहसा
प्रपतन्ति शिताः शराः ।

॥२॥

"सौधाद् वनं, वनाद् रक्षो-
गृहं, रक्षोगृहात् पुनः
तमेव सौधम्"–सीतायाः
क्व गन्तव्यमितो भवेत्! ।

॥३॥

सुखी च भाग्यशाली च
स एव पृथिवीतले
जीवनस्य, प्रतिष्ठाया-
श्च मूल्यं नैव वेत्ति यः ।

॥४॥

एका चिन्ता जीविकायाः
क्षुद्राणां, महतां त्विह
नाना चिन्ताः प्रतिष्ठायाः,
मर्यादायाः, नयस्य च ।

॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अवदातै राजकार्यै-
विख्यातः स नृपर्षभः
सीताया विषये चारात्
अश्रृणोत्किञ्चिदप्रियम् ।

॥६॥

श्रुतं तद्वचनं नाऽसीत्
आसीदन्तः प्रदाहकम्
साक्षाद् वज्रमनिर्घोषम्
अरूपम् अनिरम्भदम् ।

॥७॥

श्रुत्वैतन् नृपती रामः
शिरसीवाऽसिनाऽऽहतः
उत्तुङ्गादद्रिशिखरात्
अकस्मादिव पातितः ।

॥८॥

प्रकम्पनेनेव भूमौ
रंहसैव विपोथितः
दावाग्निनेव महता
परिवेष्टय प्रतापितः ।

॥९॥

नष्टदुःखार्जितयशः-
सर्वस्व इव सोऽध्वगः
सीमातीतां व्यथां, चिन्ताम्
वेदनां चाऽभ्युपागमत्- ।

॥१०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

"हा कष्टं! किल लङ्कायाम्
प्रविश्याऽग्नौ स्वशुद्धताम्
प्रमाणितवतीं सीताम्
पुनर्लोको विनिन्दति !

॥११॥

आस्तां, विषस्येव बल्लीम्
एतां वार्तां नवोद्गमाम्
सद्यो निर्मूलये रोद्धुम्
तद्वृद्धिप्रसरोच्छ्रयान्" ।

॥१२॥

एवं निर्धार्य, सौमित्रिम्
आहूय क्षितिपोऽवदत्–
"मैथिल्यग्नौ विशुद्धाऽपि
पुनरालोच्यते जनैः ।

॥१३॥

तदेनां लक्ष्मण! रथे
संस्थाप्य, तमसातटे
वाल्मीकेराश्रमे नीत्वा
त्यक्त्वाऽऽगच्छ यथाद्रुतम् ।

॥१४॥

स्वयं कामयमानाऽस्ति
प्राप्य शान्तं तपोवनम्
साध्वीभिर्मुनिपत्नीभिः
सङ्गन्तुं, लपितुं पुनः ।

॥१५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तपोवनस्य नाम्न्येव
श्रुते सोत्का भविष्यति
तन्नयैनां तदिच्छायाः
पूर्तव्यजिन लक्ष्मण!" ।

॥१६॥

श्रुत्वा तादृग् वज्रवाक्यम्
किञ्चित् प्रतिविवक्षति
लक्ष्मणे स नृपः प्रोचे-
"तूष्णिकामास्स्व लक्ष्मण! ।

॥१७॥

सावधानो भवेदानीम्
एवं त्वामाविशन् अहम्
नाऽस्मि रामो, न ते भ्राता,
साक्षाद् राजाऽस्मि दण्डभृत्!"।

॥१८॥

तदाकर्ण्यैव सौमित्रि-
र्मौनितां शिश्रिये यतः
को नाम विज्ञोऽति चरेत्
निर्णिक्तं राजशासनम् ।

॥१९॥

तपोवनादिदृक्षा सा
तस्याः, तत् राजशासनम्
राजभक्तस्य सौमित्रे-
श्चाऽपि साऽऽदेशवर्तिता! ।

॥२०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सीताया दुर्नियतये
सर्वं प्राध्वंबभूव तत्
कः प्रोञ्छितुं प्रभवति ?
लिखितम् भालपट्टके ।

॥२१॥

तपोवनं द्रष्टुकामाम्
प्रहृष्टां जनकात्मजाम्
रथमारोप्य सौमित्रिः
प्रस्थितो मौनमास्थितः ।

॥२२॥

किं करोतु स सौमित्रिः ?
राजादेशोऽस्ति तादृशः
उच्छलन्तः सन्ति वेगा-
न्नाना चिन्तोर्मयो हृदि ।

॥२३॥

सीता पृच्छति मार्गेषु
नाना नामानि शाखिनाम्
प्रतिवक्ति स कष्टेन,
कृत्रिमेण स्मितेन च ।

॥२४॥

सन्देग्धि सा–"प्रतिब्रूते
किं नैष प्रमदादिति" ?
सोऽपि ताम्–"किं वाचयति?
मां प्रश्नैर्विविधैरिति ।

॥२५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स विवेद शनैः शङ्कां
सीताया मुखमुद्रया
सा च तस्याऽकारगुप्ति–
प्रयासं मुखमुद्रया ।

॥२६॥

एवं स्थितौ साऽश्रुनेत्रः
सौमित्रिर्मिथिलात्मजाम्
वाल्मीकेराश्रमाभ्यासे
प्रापय्येदमवोचत– ।

॥२७॥

"देवि! वह्नौ विशुद्धाऽपि
संमताऽपि सतां गणैः
लोकापवादभीतेन
त्वं त्यक्ताऽसि महीभुजा! ।

॥२८॥

अहमानीतवान् अत्र
त्वां त्यक्तुं राजशासनात्
क्षमस्व मां देह्यनुज्ञां
देवि! मह्यं निवृत्तये ।"

॥२९॥

पतितेऽस्मिन् हि वाग्वज्रे
ऽचिन्तिते जनकात्मजा
भ्रान्तेव, नष्टसंज्ञेव,
मूर्च्छितेवाऽभवत् क्षणात् ।

॥३०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्षणाच्च लब्धसंज्ञेव
हृदि विद्धेव शङ्कुना
अन्तःक्षतेवाऽधिशतैः
सा बभूव व्यथार्दिता ।

॥३१॥

प्रथमं तारमाक्रन्द्य
किञ्चिद् धैर्यमुपागता
वाष्पसंरुद्ध कण्ठेन
लक्ष्मणं प्राह जानकी– ।

॥३२॥

"श्वश्रुजनेषु प्रणतिम्,
हार्दं सर्वासु यातृषु
नय, मत्प्रार्थनां चैताम्–
सदा मां ताः स्मरन्त्विति ।

॥३३॥

राजा त्वेवं स विज्ञाप्यः–
"यत्र कुत्राऽपि वा स्थिता
त्वद्रक्षिता भवाम्येव
भविष्याम्येव चाऽनिशम् ।

॥३४॥

यतो राज्ञोऽस्ति कर्तव्यम्
प्रजासंरक्षणं क्षतात्
तावद्धि राज्ञ आशास्यम्,
प्राप्तव्यं च प्रजाजनैः ।

॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पत्नीभावात् वर्तते मे
कर्तव्यं यद् विशेषतः
भविता नो क्षतिस्तस्मिन्
कदाचित् उत कुत्रचित् ।

॥३६॥

वेद्मि साहं साहमपि
घोरां दुःखपरंपराम्
वर्धनीयं स्त्रीजनेन
पत्युरात्ममनोबलम् ।

॥३७॥

त्वं तु प्रजानां राजाऽसि
न मद्भर्तैव केवलम्
केनाऽभवमहं त्याज्या
त्वं जानीषेऽत्र नेतरः ।

॥३८॥

तत् प्रार्थये शिवं शश्वत्–
जयोऽस्तु सततं तव,
त्वन्नीतिरस्तु सफला
दीप्तमस्तु च ते यशः ।

॥३९॥

गर्भरूपस्तु तव यो
निक्षेपोऽस्ति मया सह
स त्वया न्यायदृष्ट्यैव
स्मर्तव्यः सुतरामिति" ।

॥४०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तथैवाऽहं करिष्यामी-
त्युक्त्वाऽऽमन्त्र्य, प्रणम्य च
ततो निवृत्ते सौमित्रौ
उच्चैश्चक्रन्द मैथिली ।

।।४१।।

ततस्तस्याः क्रन्दितं तत्
केवलं न ऋषेर्वनम्
अयोध्यामेव सकला-
मप्यक्रन्दयदुत्सुकाम्–।

।।४२।।

"स्तुता शीलैर्मातृकुले
ह्यस्माभिश्च प्रजाजनैः
साक्षाद् देवीव मातेव
राष्ट्रश्रीरिव चार्हिता ।

।।४३।।

अस्मद्राज्ञी जनकजा
त्याज्याऽभूत् केन हेतुना ?
कुत्राऽस्ति सा कथङ्कारम् ?
वर्तते कस्य रक्षणे ? ।

।।४४।।

भवेत् यत्र ह्यदोषाऽपि
स्वयं राज्ञ्यपि दण्डिता
कथं वसेम भोः अत्र
वयं निःशङ्कचेतसा ? ।

।।४५।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धिग् धिग् धिगेवमन्यायो
रामराज्येऽपि दृश्यते ?
को भेदस्तर्हि सत्कीर्तौ
रामेऽन्येषु नृपेषु च ।

॥४६॥

तर्ह्यन्तरिक्षं पतति
विपर्यस्यति मेदिनी
चन्द्रसूर्यौ निलीयेते
स्तम्भते च समीरणः ।"

॥४७॥

एवं प्रश्ना अयोध्याया
मार्गे मार्गे गृहे गृहे
उल्कापाता इवोद्भूताः
शासनं पर्यतापयन् ।

॥४८॥

श्रुत्वा तन्नृप आहूय
प्रोवाच स्वस्य मन्त्रिणः–
"सीताया विषये लोकान्
यूयं बोधयत द्रुतम्" ।

॥४९॥

ततो बद्धाञ्जलिर्भूपम्
मुख्यो मन्त्री न्यवेदयत्–
प्रभो! मम स्थूलबुद्धिः
एवमेव हि पश्यति– ।

॥५०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

"वर्तते यन्न संशोध्यं
परिवर्त्यं च जात्वपि
तादृशे विषये नैव
चर्चां विस्तारयद् बुधः ।

॥५१॥

नैव शाम्यति वार्तेयं
यदि राज्येन चर्च्यते
स्वयं स्तोकेन कालेन
शाम्येद् वरमचर्चिता ।

॥५२॥

को राष्ट्रोऽलं समाधातुम्
प्रजाप्रश्नान् अनर्गलान्
तत्स्थाप्या नैव राज्येनो-
त्तरवित्री परंपरा ।

॥५३॥

अन्यथोत्तरदस्यैव
गच्छेयू राज्यवासराः
तदीदृशे हि विषये
वरं मौनावलम्बनम् ।"

॥५४॥

तदाकर्ण्यैव नृपतिः
प्रोचे- "मैवमुदीरय
तथा कृते स्वप्रजानाम्
स्यादसह्या तिरस्क्रिया! ।

॥५५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रजाः सेव्याः, प्रजाः स्नेह्याः
को राष्ट्रः प्रजया विना ?
तत् प्रजैव हि सर्वस्वम्
राष्ट्रस्येति विभावय ।

॥५६॥

प्रजावर्गोऽस्ति नः स्वामी
वयं तत्कर्मचारिणः
तद् धार्यं कथमस्माभिः
मौनं स्वामिनि पृच्छति ।

॥५७॥

वर्तमानं तु सन्दर्भम्
प्रकृत्य सकलाः प्रजाः
अन्याय्यमेव मन्वाना
यद् विरुन्धन्ति सांप्रतम् ।

॥५८॥

तद्युक्तमेव हि यत-
स्तद्रहस्यं यथातथम्
स्वयं न विदितं ताभि-
रस्माभिश्च न वेदितम् ।

॥५९॥

अन्यच्च-ता मातृबुद्ध्या
सोतां पश्यन्ति, सा च ताः
स्वसन्ततीरिव प्रेष्ठाः
स्निह्यति स्माऽन्तरात्मना ।

॥६०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तन्ममत्वावेशतस्ता
न्यायान्यायौ यथातथम्
नाऽलं विवेक्तुं तेनैव
क्रन्दन्ति, प्रलपन्ति च ।

॥६१॥

एवं न्यायविवेकाय
स्खलन्त्योऽपि प्रजा दृढम्
अन्यायं नोऽसहन्तेति
गर्वं वहति मे मनः ।

॥६२॥

यतो जातेऽपि हि नृपे
स्वयमन्यायकारिणि
न पीड्यन्ते, न शोष्यन्ते
प्रबुद्धा ईदृशः प्रजाः ।

॥६३॥

अन्यायं सहते योऽन्धः
स स्वं, राष्ट्रजनान्, स्वकम्
राष्ट्रं च दन्दह्यमानान्
पश्यन्नपि न पश्यति ।

॥६४॥

अन्यायमत्तकरिणो
मुखे गह्वरविस्तृते
असंख्येयाऽपि राष्ट्रस्य
संपत्तिर्जीरकायते ।

॥६५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदन्यायं विरुन्धाना
स्रस्टव्यैव परम्परा
किन्त्वन्यायोऽत्र नास्तीति
प्रबोध्या अद्य मे प्रजाः ।
॥६६॥

स्वप्रजानां प्रबोधाय
तदेवं मम शासनम्
राजपत्राऽङ्कितं कृत्वा
स्थाप्यं प्रतिचतुष्पथम्- ।
॥६७॥

एवं राजा घोषयति-
दयिता मम हे प्रजाः
मद्वंशीयैर्नृपैः स्नेहात्
यूयं पालितपोषिताः ।
॥६८॥

आस्त यूयम् सदा हृष्टा
अन्यायोऽभून्न कुत्रचित्
अभजध्वं नृपान् यूयम्
अस्निह्यन् क्षितिपाश्च वः ।
॥६९॥

तद्वंशीयोऽहमस्म्यद्य
राजाऽत्र शासनाय वः
राजर्षीणां पूर्वजानाम्
नीतिमार्गमनुव्रतः ।
॥७०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न्यायेन ध्रियते राष्ट्रम्,
प्रजानां जीवितम्, धनम्
तद् राज्यस्याऽस्ति कर्तव्यम्
प्रथमं न्यायरक्षणम् ।

॥७१॥

न्यायरक्षार्थमेवाऽयम्
सन्दर्भोऽस्ति नवोद्गतः
शृणुध्वमथ बुध्यध्वम्
च विवेकवता हृदा ।

॥७२॥

सीताया योऽपवादोऽस्ति
स सत्योऽस्त्यथवा नहि
एतत्तु यूयं जानीत
सम्यक्, नो भाविनो जनाः ।

॥७३॥

तेन भावीतिहासस्तु
न जानानो यथातथम्
निमील्य चक्षुषी गाढम्
एवं नो दूषयिष्यति–।

॥४७॥

वेदं वेदं दुश्चरित्राम्
श्रावं श्रावं च गर्हणाम्
रामः सीताम् स्निह्यति स्म
दधत् गजनिमीलिकाम् ।

॥७५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनुसन्धीयतेऽनेन–
"राजानः सूर्यवंशिनः
भवन्तिस्म प्रजाकांक्षा–
निरपेक्षा निरङ्कुशाः ।
॥७६॥

कामोपभोगपरमाः
कामवृत्ता मदोद्धताः
न्यायधर्मविवेकैश्च
हीनाः स्वार्थप्रवृत्तयः ।
॥७७॥

अयोध्यायाः प्रजाश्चाऽऽसन्
अप्रबुद्धा अचेतनाः
जीवन्मृता इवाऽन्यायम्
सहन्तेस्म परैः कृतम् ।"
॥७८॥

एवं स्याद् राजवंशस्य
प्रजानां च विगर्हणा
व्याप्य विश्वं प्रवर्त्स्यन्तीं
कस्तां रोद्धुं क्षमो भवेत्? ।
॥७९॥

तेन सोढेऽपवादेऽस्मिन्
अन्यायो जायते महान्
सूर्यमूले राजवंशे
स्वस्य राष्ट्रे प्रजासु च ।
॥८०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्मिश्च रक्षितेऽन्याये
स्वार्थात्, सा न्यायघातिनी
परंपरा वसेत् राष्ट्रे
तन्मया स व्यपोहितः ।

॥८१॥

तेन दोषेण हीनाऽपि
सच्चरित्रापि साध्व्यपि
प्राणप्रियाऽपि सा राज्ञी
राज्ञा निर्बासिता मया ।

॥८२॥

तन्मे प्रियाः प्रजा! एतत्
बुद्ध्वा भजत धीरताम्
राष्ट्रस्य नश्च कल्याणम्
विदधातु सदा शिवः" ।

॥८३॥

श्रुत्वेदं शासनं, भूपम्
प्रशशंसुः प्रजाः, परम्
न तत्यजुः शोचितुं च
हृदा संस्मृत्य जानकीम् ।

॥८४॥

साकेतश्च स्वकार्येषु
राज्याङ्गेषु रतेष्वपि
सर्वशून्य इवाऽमोद-
विरहादिव दुःस्थितः ।

॥८५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नष्टश्रीरिव चिन्ताभि-
र्दग्धात्मा मौनमास्थितः
निरुत्सवो निश्छविश्च
समदर्शि समीक्षकैः ।
॥८६॥

इति द्वितीयः सर्गः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तृतीयः सर्गः

आजग्मुर्लवणत्रस्ता
जना ऋषिपुरःसराः
द्रष्टुं रामं मूर्तरूपम्
न्यायविक्रमतेजसाम् ।

॥१॥

ते विनीताः प्रोचुरेवम्
भूपतिम्—"जय पार्थिव !
शृण्वन्तः स्मो वयं विष्वक्,
त्वद्यशो गीयते जनैः ।

॥२॥

संरक्षता वनं गत्वा
स्वपितुः सत्यसन्धताम्
पितृभक्तेर्महादर्श—
स्त्वया संस्थापितो भुवि! ।

॥३॥

प्रजावर्गो वत्स इव
स्नेहसौस्थित्यलालितः
गामिव त्वद्राज्यसत्ताम्
अजस्रमनुवर्तते ।

॥४॥

रामचन्द्रे समुदिते
त्वयि नक्षत्रवत्, परे
नृपा बिभ्रत्यद्य लज्जा-
वनतां निष्प्रभां स्थितिम् ।

॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राजन्! तमोनिरासाय
विवस्वानिव सांप्रतम्
अन्यायस्य निरासाय
जनैस्त्वं स्मर्यसे भुवि ।
॥६॥

शश्वकवणदैत्येन
पीडिता दग्धचेतसः
वयं दर्शयितुं दुःखम्
मथुरातः समागताः ।
॥७॥

भ्राम्यन् वनाद्वनं लङ्काम्
यावत् प्राप्य च सर्वतः
अपानयस्त्वमन्यायम्
लोककल्याणहेतवे ।
॥८॥

परं दुर्भाग्यतोऽस्माकम्
अन्यायाऽस्तित्वगुप्तये
प्राप्तस्वाम्येव लवण-
राज्यसत्ता दुनोति नः ।
॥९॥

हते त्वयाऽन्यायपतौ
रावणे भयविद्रुताः
अन्यायाः सकला अस्मन्-
मथुरामिव शिश्रियुः ।
॥१०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परितस्तमसाऽऽक्रान्ताः
खगा इव निराश्रयाः
शरण्यं त्वां वयं प्राप्ताः
महान्तमिव शाखिनम् ।
॥११॥

अकारणेऽपि सहसा–
ऽऽक्रामकाल्लवणासुरात्
अकालमृत्योरिव नः
संरक्ष वसुधाधिप!" ।
॥१२॥

विज्ञापयत एवं तान्
मध्ये रुद्ध्वा महीपतिः
प्रोचे–"किं किं विधत्ते सः ?
सन्ततं पीडनाय वः ।
॥१३॥

ब्रूत तद्विषये सर्वम्
तादृशं लोककण्टकम्
प्रतिजाने घातयिष्ये,
यूयं भवत निर्भयाः" ।
॥१४॥

इत्युक्तवन्तं श्रीरामम्
ते प्रोचुर्हर्षगद्गदाः–
"धन्योऽसि राजन्! धन्योऽसि
यत् स्निह्यस्येवमर्थिषु! ।
॥१५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अस्माभिः पीडितैः सास्रम्
के वा नाऽभ्यर्थिता नृपाः?
परं क्वचिन्नाऽप्तवन्तः
प्रतिज्ञागिरमीदृशीम् ।
॥१६॥

ग्रीष्मतप्तेष्विवाऽभ्रस्य
नादेन त्वत्प्रतिज्ञया
जातमाश्वासनं दैत्य-
तप्तेष्वस्मासु शान्तिदम् ।
॥१७॥

आशास्महे त्वत्प्रतिज्ञा
मेघनिर्घोषवद् द्रुतम्
निर्मूल्याऽवग्रहरिपुम्
सोष्पते शान्तिसंपदौ ।
॥१८॥

"किं किं विधत्त इति किम्
कथयाम दुराशयः
राज्यं हि स स्वसंपत्तिम्
स्वोपभोग्यं च मन्यते ।
॥१९॥

दिविषद्भ्यस्तापसेभ्यो
विद्वद्भ्यो, राष्ट्रभूतये
कार्यकर्तृभ्यश्च बहु
स्वं पूजार्हं स मन्यते ।
॥२०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राज्यं विच्छिद्यताम् कामम्
तत्र न व्यथते, परम्
कामोपभोगं तु निजम्
अविच्छेद्यं स मन्यते ।

॥२१॥

विशां दैन्यक्रन्दनेषु
माधुर्यं निर्विशन्निव
स क्रूरहृदयस्तानि
प्रवर्त्यान्येव मन्यते ।

॥२२॥

वंशानुक्रमतः प्राप्तात्
राज्यात् राजपदादपि
मद्यवारस्त्रियोरेव
मूल्यं स बहु मन्यते ।

॥२३॥

स्ववंश्यवर्जं सुधियो
विदुषश्चिन्तकानपि
जनान् हीनदृशा पश्यन्
तृणायैव स मन्यते ।

॥२४॥

राज्योन्नतिविकासाय
व्यक्तान् भावान् बुधैर्जनैः
स्वोपभोग्ये राज्यसुखे
विघ्नानिव स मन्यते ।

॥२५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पदेषूच्चेषु राज्यस्य
निर्युक्तिं योग्यतावताम्
स स्वेनैव कृतं शीर्ष-
प्रहारमिव मन्यते ।
॥२६॥

एवं दुरुपयुञ्जानो
राज्यं, राज्यधनान्यपि
विधेर्विष्णोः शिवाच्च स्वम्
श्रेष्ठमेव स मन्यते ।
॥२७॥

राज्ये धर्मं, संस्कृतिं चा-
स्कन्दतः प्राकृतान् जनान्
उत्थाप्य क्रमशः श्रौतम्
मार्गं स निरुरुत्सति ।
॥२८॥

पशुमारं मारयित्वा
साधूनार्षपथानुगान्
आसुरीं संस्कृतिं घोराम्
आविश्वं स तितांसति ।
॥२९॥

स मौलिकाधिकारेण
जनान् राज्ये प्रवञ्चयन्
मानवानां पशूनां च
भेदानपनिनीषति ।
॥३०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अध्यक्षत्वेन सर्वत्र
तद्भक्ता एव संस्थिताः
परस्परं प्रशंसन्ति
अहो रूपमहो ध्वनिः! ।

॥३१॥

न सन्ति नियता न्याया
न च न्यायाय संसदः
असुराणां गिरो न्याया
असुरा एव संसदः ।

॥३२॥

हिमप्रदेशे नीहार
इव तत्राऽपि तन्नयः
स्थानीयानां विकासस्य
द्वेष्टा रोद्धा च वर्तते

॥३३॥

शैक्षिकं नैतिकं चाऽपि
विकासं तेन विघ्नता
किमद्यकीकृता वृत्या
स्वल्पया दानवेतरे ।

॥३४॥

निर्वृत्तयोऽशिक्षिताश्च
वृत्त्यै तच्चारतां गताः
जना बन्धून् विनाश्याऽपि
द्रढयन्त्येव तन्नयम् ।

॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तेन सर्वेष्वविश्वासात्
एकताविरहेण च
नो गर्हितं तस्य नयम्
रोद्धुं शक्नुवते प्रजाः ।
॥३६॥

पिशुनैः कण्टकैर्न्यायै-
श्चाऽपि वन्दीकृता वयम्
नैव किञ्चिन्मनोनीतम्
लेखितुं भाषितुं क्षमाः ।
॥३७॥

असिधारेव तन्नीतिः
कथं सह्येत सर्वदा
शरणं त्वां प्रपन्नाः स्मो
जहि पालय वा नृप ! ।
॥३८॥

भयं चैतत् स चेत् विद्यात्
एतां नः शरणागतिम्
सन्निवर्तमिहै तत्र
कथम्?, अस्मान् हनिष्यति! ।
॥३९॥

एवं राज्यस्थितिम् शोच्याम्
उपवर्णयतो जनान्
प्रोवाच नृप–"उक्त्वाऽलम्
निःशेषं विदितं मया ।
॥४०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा भैष्ट, वो निहन्तुं स
नेतः शक्ष्यति जात्वपि
तं तादृशं कार्यविधिम्
प्रबन्धास्मि यथाद्रुतम् ।
॥४१॥

यूयं स्मरत–"निःशेषा–
श्चिन्ता वो हृदि संस्थिताः ।
उद्धृत्य राज्ञा रामेण
हृदि स्वे निहिता इति" ।
॥४२॥

मन्येऽहं यदि भूतेशः
प्रसीदतितमाम् मयि
लप्स्यतेऽद्यैव लवणः
स्वप्ने स्वाऽनिष्टसूचनाम्" ।
॥४३॥

माथुरानेवमाश्वास्य
नृपः शत्रुघ्नमादिशत्-
"गत्वा शत्रुघ्न! मथुराम्
जहि तं लवणासुरम् ।
॥४४॥

अद्यैव त्वाऽभिषिञ्चामि
मथुरायाः सतीः प्रजाः
शाधि त्वं राजधर्मेण
तासां सुखसमृद्धये" ।
॥४५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राज्ञस्तदादेशवाक्यम्
मथुराभालपट्टगम्
शुभभक्षरसंस्थान-
मिवाऽमन्यत माथुरैः ।
॥४६॥

शत्रुघ्नोऽपि तमादेशम्
श्रुत्वा भूपतिमब्रवीत्-
राजन्! भक्त्या त्वदादेशम्
शीर्षेणैव वहाम्यहम् ।
॥४७॥

किन्तु ज्ञानानुभवतः
श्रेष्ठे भ्रातृद्वये सति
यवीयसा मया राज्ये
कृते स्यादपि धृष्टता! ।
॥४८॥

किञ्च-त्रुट्या स्वल्पयाऽपि
राज्यं याति विपन्नताम्
आतङ्कन्ते तत्प्रजाश्च
निराजीवा निराश्रयाः ।
॥४९॥

"अलङ्घ्योऽस्ति त्वदादेशः"
इत्येतद् वेद्मि केवलम्
परं नजाने त्वत्कीर्तिः
स्यान्नवा मम कर्मणा! ।
॥५०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अस्त्वक्षतं तव यशः
तच्च नो वंशगौरवम्
तत् पूर्वं को राज्यधर्मः
शिक्षणीयोऽस्म्यहं त्वया" ।

॥५१॥

भूपतिः प्राह--"नास्त्येव
काकुत्स्थकुलजस्य ते,
राज्ञोऽनुजस्य, सूनोश्च
राजधर्मस्तिरोहितः ।

॥५२॥

तथाऽपि शिक्षणीयत्वम्
आत्मनो यत् प्रदर्शितम्
तत्ते विनयसंमाना–
ऽभिव्यक्तिर्मयि केवला ।

॥५३॥

तथापि शिक्षये प्राक्ते
कृत्वा राज्याभिषेचनम्
यतोऽद्य सन्मुहुर्तोऽस्ति
न त्याज्यः स शुभेच्छुभिः।

॥५४॥

इति तृतीयः सर्गः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चतुर्थः सर्गः

शत्रुघ्नं मथुराराज्ये-
ऽभिषिच्य नृपतिः स्वकम्
किञ्चिद् भारं ह्यवसितम्
मत्वा लेभे परां मुदम् ।
॥१॥

स्वकीयमथुराराज्या-
ऽभिषेचन महोत्सवम्
साक्षादकुर्वन् साकेते
माथुरा विस्मितात्मना ।
॥२॥

तेऽस्मरन् माथुरा राज्ये
शत्रुघ्नस्याऽभिषेचनम्
साक्षाद् दुर्दिष्ट विहितम्
लवणस्याऽभिषेणनम् ।
॥३॥

स्वीकृत्याऽज्ञां प्रयास्यन्तम्
राज्याय मथुरां प्रति
शत्रुघ्नमेवं नृपतिः
कर्मतत्त्वमुपादिशत्- ।
॥४॥

राजा स्यान्नापितो वा स्यात्
सकलैः कर्मकर्तृभिः
साधारणं कर्मतत्त्वम्
बोद्धव्यं कर्मसिद्धये ।
॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

卐कर्मसूच्चावचत्वं तु
नाऽस्त्येवैतत्तु वर्तते
भावनायाम्–"कर्म कुर्वन्
किं किं भावयते जनः!"।

॥६॥

फलाशया कृतं कर्म
भवेद् बन्धस्य कारणम्
विसृज्य तां कृत्यधिया
कृतं मोक्षस्य कारणम् ।

॥७॥

कामस्पृष्टं कर्म सूते
ह्यशान्ति, पतनम्, भयम्
निष्कामं त्वभयं, शान्तिम्
आत्मोत्थानं च शाश्वतम् ।

॥८॥

कर्तव्यबुद्ध्या विहितम्
निष्कामं कर्म कोविदाः
आर्यजुष्टं कीर्तिकरम्
स्वर्ग्यं चेति प्रचक्षते ।

॥९॥

बुद्ध्वाऽप्येतत् कर्मतत्त्वम्
राजधर्मो विशेषतः
राज्यं विधित्सता ज्ञेयः
इत्यहं वच्मि–तं शृणु! –।

॥१०॥

卐स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः इत्युक्तेः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राष्ट्रस्य धृतये, शश्वद्
भूतयेऽथ समृद्धये
यत्कर्तव्यं भवेद् राज्ञो
राजधर्मः स ईरितः ।
॥११॥

राजधर्मः सुबोधोऽस्ति
सुकरश्च यतात्मनाम्
स दुर्बोधो दुष्करश्च
स्वभावादयतात्मनाम् ।
॥१२॥

प्रजारञ्जनमेवाऽस्ति
राज्ञो यज्ञस्तपो व्रतम्
नाऽस्त्येव राज्ञो हि कृते
तदन्यो धर्म उत्तमः
॥१३॥

विवेच्यमेतत् कार्येषु
प्रजानां रञ्जकेष्वपि
त्वया तान्येव कार्याणि
यैर्यैस्त्वं न निबध्यसे ।
॥१४॥

राज्यं कुरु व्यापिकया
दृष्टयाऽनासक्तचेतसा
येन प्रजा रञ्जयसे
कर्मबन्धाच्च मोक्षसे ।
॥१५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विस्मृत्य स्वं प्रजाराष्ट्र-
कल्याणाय समर्पितः
राजास्वंस्यैव कल्याणम्
कुर्वन् भवति वस्तुतः ।

॥१६॥

पूर्वे राजर्षयो राज्य-
मकार्षुर्निः स्पृहात्मना
तेन ते यशसा लोके-
ऽमरभावं प्रपेदिरे ।

॥१७॥

योऽस्ति राजा हिरण्याक्षः,
क्लिश्नाति स्वप्रजा अपि
स स्वस्यैव महानिष्टम्
कुर्वन् भवति वस्तुतः ।

॥१८॥

कामोपभोगपरमाः
ईदृक्षाः कति भूभुजः
कालदष्टाः श्ववज्जाताः
स्ववंश्यैरप्यचर्च्यताम् ।

॥१९॥

तेनात्मोन्नतिमिच्छद्भि-
र्भूपैरपि प्रजाहितम्
स्मृत्वा स्वहितमश्रान्तं
कर्तव्यं कर्म निश्छलम् ।

॥२०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रजाभ्यो बलिषड्भाग-
माददानेन भूभृता
वृत्युन्नत्योरवसरः
प्रतिदेयः प्रजाकृते ।
॥२१॥

तदर्थे राजकृत्यानि
सन्ति त्रीणि–दमोऽसताम्,
सतां संरक्षणम्, न्याय-
दानं च स्वविवेकतः ।
॥२२॥

राष्ट्रमस्त्येकमुद्यानम्
विशालम्, तस्य रक्षकम्
निरीक्षकं वर्धकं च
मालिनं विद्धि भूपतिम् ।
॥२३॥

संरक्ष्या मालिना वृक्षाः
प्रतिरोप्याश्च वृक्षकाः
उत्खातव्याः कण्टकिनः
उद्यानस्य समृद्धये ।
॥२४॥

राज्ञा भाव्यं कुलिशवत्
खले, साधौ च पुष्पवत्
भाव्यं चैतन्ययन्त्रेण
सृष्टेनेव प्रजाकृते ।
॥२५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शक्तिदीप्तेनाऽपि पर–
दुर्धर्षेणाऽपि जात्वपि
प्रजास्वाहोपुरुषिका
न प्रदर्श्या महीभुजा ।
॥२६॥

अक्षे हि राजप्रजयोः
स्नेहरूपे ग्रहो यथा
वत्स! राज्यं बम्भ्रमीति
बोभूतात् एवमेव हि! ।
॥२७॥

तत् प्रजा माऽवमन्यस्व
मा विध्य कटुवाक्यतः
मा निर्दयं दण्डयता–
स्त्वां मुञ्चन्ति तथा स्थितौ ।
॥२८॥

न्यक्करोति प्रजाः, द्वेष्टि
प्राज्ञेभ्यो, नो स्वदुर्गुणान्
जानीते–त्रयमेवैतत्
राज्ञो पातस्य लक्षणम् ।
॥२९॥

स्वार्थान्धो नृपतिर्वैद्यम्
पुरःस्थमपि तद् भयम्
न वेत्ति, तेन महतः
प्रपातात् प्रपतत्यसौ ।
॥३०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तादृशो भिन्नमर्यादः
कामवृत्तो मितव्ययः
अहंयुर्नृपतिर्नालम्
स्वप्रजा अनुशासितुम् ।
॥३१॥

अदण्डितेषु प्रत्यक्षम्
स्वजनेष्वपराधिषु
नाऽलं स्थापयितुं राजा
स्वप्रजास्वनुशासनम् ।
॥३२॥

प्रजासु निष्फले राज्य
यन्त्रकीलेऽनुशासने
राज्यशक्तिः क्षिणोत्येव
राष्ट्रं यात्येव विप्लवम् ।
॥३३॥

प्रजाजनेऽनुरक्ते हि
संभवेदनुशासनम्
प्रजानुरागकार्याणि
चाऽनुशिष्टे प्रजाजने ।
॥३४॥

तत् राजा नो क्षोभयेत् स्वाः
प्रजाः, प्रत्युत रञ्जयेत्
मिथोऽनुरागे हि तयो
राज्यलक्ष्मी स्थिरा भवेत् ।
॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुर्वन्ति स्वस्वकर्माणि
राज्याङ्गानि यथातथम्
एतत् सत्यापयन्तेऽस्मद्-
देहाङ्गानां क्रियाश्च नः ।
॥३६॥

मुखमङ्गेषु वपुषो
राज्याङ्गेषु नृपो यथा
धत्ते श्रेष्ठत्वमन्येषाम्
स्वार्जितेन प्रपोषणात् ।
॥३७॥

चेदुपेक्ष्येतराङ्गानि
नाऽभरिष्यन्मुखं तथा
तर्हि तत् स्वं, स्वशक्तिं चा-
ऽनाशयिष्यत् सहैव तैः ।
॥३८॥

यशस्यं तन्नीतिमत्त्वम्
उदारस्य मुखस्य हि-
स्वस्याऽन्येषां प्रतीकानाम्
चाऽस्ति कल्याणकारकम् ।
॥३९॥

अन्यान्यङ्गानि च तनोः
आत्मभावेन तन्मुखम्
पृथक् पृथक् स्वसाहाय्यै-
र्योजयन्ति व्यवस्थितैः ।
॥४०॥

इदमुपमानं तुलसीकृत रामायणाधारं सदुपयोगायोद्धृतम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अस्तु राज्यप्रजावर्ग-
संबन्ध ईदृगेव हि
तेनैव राष्ट्रदेहस्य
सर्वाङ्गीणं हितं भवेत् ।
॥४१॥

तद् रिरक्षिषताऽऽत्मानम्
राज्यशक्तिं च भूभृता
प्रतार्या नैव राज्याङ्गम्
प्रजाः स्वार्जितवैभवैः ।
॥४२॥

न्यायवृत्त्यादिदानेन
रक्षयाऽऽत्मविकासकैः
विधिभिश्च प्रजाः सेव्या
राज्यस्योद्देश्यपूर्तये ।
॥४३॥

शासकः शासितान्, आढ्या
दीनान्, ऊर्जस्विनोऽबलान्
न पीडयेयुरित्येतत्
त्रयं राज्यादपेक्ष्येत ।
॥४४॥

प्रजासंबद्धकार्येषु
कार्याकार्यवि र्यय:
संभवेत्तेन मध्यस्थै-
रुक्तं राजा न विश्वसेत् ।
॥४५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रजानां दुःखकष्टादि
श्रोतव्यं भूभुजा स्वयम्
भवितव्यं नैव तेन
दुर्दर्शेण प्रजाजनैः ।

॥४६॥

प्रजाः स्युर्दूरतः साक्षा-
दसंपृक्ते महीपतौ
तद्राज्ञा विवृतद्वारम्
कर्तव्यं स्वं सभागृहम् ।

॥४७॥

लभेरन् नियते काले
प्रजाः स्वस्य महीपतिम्
समष्टिव्यष्टिदुःखानि
निवेदयितु मञ्जसा ।

॥४८॥

सहायसाध्यं भवति
कार्यं लघ्वपि चेन्नृणाम्
कथं नु चलताद् राज्यम्
विना गुर्वीं सहायताम् ।

॥४९॥

अन्यश्च-स्वेच्छया राज्यम्
कुर्वन् राजा निरङ्कुशः
भवेत्, प्रजानां द्वेष्यश्च
स्खलनात् राज्यकर्मसु ।

॥५०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत् स साहाय्यमाप्तुं, स्वम्
स्वेच्छाचाराच्च रक्षितुम्
राज्यं प्रजाप्रतिनिधि-
सभानिर्णयतश्चरेत् ।
॥५१॥

राष्ट्रोत्थानमहोद्देश्य-
पूर्तयेऽत्र बहूनि हि
कार्याणि सन्ति कर्माणि
लघूनि च बृहन्ति च ।
॥५२॥

लक्ष्यमात्रेण का सिद्धिः ?
राज्ये स्याच्चेन्न योजना
किंकृत्यमूढः स्वैरेव
जनै राजा विहस्यते! ।
॥५३॥

तद् भव्ययोजनावद्भिः
राष्ट्रराजप्रजोचितैः
परामर्शैः स्वसाहाय्य-
क्षमान् कर्तव्यतत्परान् ।
॥५४॥

कुलीनान् इन्द्रियजितो
निर्मानान् कृत्यकोविदान्
मन्त्रसंवरणे शक्तान्
नीतिशास्त्रविशारदान् ।
॥५५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मंत्रिणः कुरु नो मूर्खान्,
नाऽर्थलुब्धान्, न नास्तिकान्
नाऽत्मसंमानरहितान्
जीवित्वाऽपि शवायितान् ।

॥५६॥

एकं सहस्रान्मूर्खाणाम्
आद्रियस्व मनीषिणम्
यन्नेयोऽस्ति हि राज्यस्य
प्लवः संकटसागरे! ।

॥५७॥

प्रायो राज्ये नैकविघ्ना
आपतन्ति, तुदन्ति च
तेष्वेषणाशूर्पणखा–
प्रेरितः कामलम्पटः ।

॥५८॥

द्विषन्ननासक्तधियं,
निकुर्वन् विश्वभावनाम्
स्वार्थैकदृक् कुसंस्कार–
रूपो लोकप्रपीडकः ।

॥५९॥

रावणो हन्यमानोऽपि
मर्त्यहृत्सु स जीवति
यावद् भूव्योमनी, यावच्
चन्द्र सूर्यौ स गर्जति! ।

॥६०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्मात् उद्यतदण्डेन
सर्वत्र शङ्कितात्मना
सदैवोन्निद्रितदृशा
भाव्यं राज्यकृता त्वया ।

॥६१॥

मिलिताः परचक्रेण
भवेयुस्तव मंत्रिणः
उताऽयुक्ताः प्रजावर्गम्
क्लिश्नीयुः स्वस्वकर्मभिः ।

॥६२॥

उतोत्कोचस्य लोभेन
प्रमाणात् संयतानपि
विसर्जयेयुश्चौरादीन्
निभृतं रक्षिणस्तव! ।

॥६३॥

तथात्व एकतो राज्य–
नृपयोर्गर्हणा भवेत्
अन्यतो ह्यपरज्यन्ते
क्लिश्यन्ति च समाः प्रजाः ।

॥६४॥

एवं नानाविधैरुग्रै–
रन्यायैरतिपीडिताः
प्रजाः समस्ता दूयेरन्
त्वां शपेरंश्च नित्यशः ।

॥६५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परचक्राच्च किं कीदृक्
कदा वज्रं पतेदिति
चिन्तनीयं भवेद्राज्ये
सावधानतया नृपैः ।

॥६६॥

स्वचक्रपरचक्राभ्याम्
संभवन्तीषु भीतिषु
अपरक्तः प्रजावर्गः
आधत्ते प्राणरंहसी ।

॥६७॥

तदन्यायोऽस्त्यनर्थानाम्
अपायानां च कारणम्
निर्मक्षिकीकृत्य तं स्वाः
प्रजास्तोष्या महीभुजा ।

॥६८॥

तेनैव स्वच्छनिष्पक्ष-
न्यायाधारे प्रतिष्ठितम्
राज्यमेव हि विद्वांसो
दृढं श्रेष्ठं च मन्वते ।

॥६९॥

प्रजानां विभवाः प्राणा
यन्निघ्नाः सन्ति सन्ततम्
स न्यायः स्थितिबोधाय
राष्ट्राणां दर्पणायते ।

॥७०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदेवंशक्तिकं न्यायम्
मा प्रयुङ्क्ष्व्यन्यहस्ततः
स्वयं प्रयुङ्क्ष्धि तं कस्या-
ऽप्यपश्यन् मुखमग्रतः ।
॥७१॥

उद्दण्डो, भिन्नमर्यादः
कामवृत्तोऽन्यपीडकः
दण्डनीयः स्वपुत्रोऽपि
राज्ञा न्यायं प्रकुर्वता ।
॥७२॥

प्रजानां परितोषाय
राजर्षिः सगरः पुरा
वहिश्चकार राज्यात् स्वम्
तासां पीडकमात्मजम् ।
॥७३॥

राज्यारंभक्षणादेव
त्वया राष्ट्र-प्रजाद्विषाम्
दण्डनाय दृढो न्यायो
घोषणीयो यथाद्रुतम् ।
॥७४॥

उद्घोष एष ते मेघ-
निर्घोष इव माथुरान्
शुभार्यांत लक्षयिता
विशिंषन् तव शासनम् ।
॥७५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कार्यान्वितेनैव भाव्यम्
प्रतिज्ञातेन भूभुजा
अन्यथा तु प्रतिज्ञैव
न कार्या तेन जात्वपि ।
॥७६॥

यः प्रजार्थे प्रतिज्ञातम्
करोत्यह्नाय सक्रियम्
कृत्वा गर्वं चाऽदधाति
स राज्यार्हेषु गण्यते ।
॥७७॥

प्रजार्थे संकटैर्युद्ध्वा
सोढ्वा च विषमाः स्थितीः
आस्कन्दति सपत्नान् यः
स राज्यार्हेषु गण्यते ।
॥७८॥

अवर्धेहि प्रतिज्ञायाः
पूरणात् स्यान्महीभुजः
एको लाभोऽपूरणात्तु
स्युः क्षतीनां शतान्यपि ।
॥७९॥

तं बन्ध्यघोषणं भूपम्
शरन्मेघमिव प्रजाः
नाऽद्रियन्ते द्रुमिव च
निष्फलच्छायमुच्छ्रितम् ।
॥८०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

केचिद् भवन्ति राज्यस्या-
रुन्तुदाः क्षुद्रवृत्तयः
दोषैकदृष्टयो धूर्ता
असिद्धान्ता अदर्शनाः।

॥८१॥

त्वां बन्ध्यघोषणं कृत्वा-
ऽक्षमतां ते प्रचार्य च
प्रापय्य संकटे त्वत्तः
कञ्चिल्लाभं विधित्सवः।

॥८२॥

विघ्नन्तश्च सदा राज्य-
कर्मण्येव पुनः पुनः
तादृशान् दमयाऽऽशु त्वम्
मत्वा राज्यस्य वैरिण।

॥८३॥

तेषु स्थितेषु नैव स्यात्
राज्यं जात्वप्यकण्टकम्
तद् दण्ड्यास्ते, तत्र दण्डात्
नाऽन्यः पन्था हि विद्यते।

॥८४॥

परं दण्डप्रयोगाया-
ऽवधेयं साधु भूभुजा
अविविच्य कृतो दण्डः
कुरुते महतीं क्षतिम्।

॥८५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तीक्ष्णे दण्डे विशां क्षोभो
मृदावुन्मार्गगामिता !
दण्डप्रयोगवैदुष्ये
एवाऽस्ते राज्यकौशलम् ।
॥८६॥

दृष्टानि दण्डच्यकर्माणि
कुशिक्षादुष्प्रभावतः
कृतानि शिक्षितैरेव
ज्ञात्वाऽपि मलिनात्मभिः ।
॥८७॥

तेनैवाऽपाततो दण्डो
नाऽर्होऽस्ति स्मर्तुमीहितुम्
तथाप्येतैः कारणैः स
राज्ये धर्मतया मतः ।
॥८८॥

राज्ये शान्ति स्थापयितुम्
व्यवस्थां प्रतिरक्षितुम्
प्रजाः पातुं चाऽस्ति राज्ञाम्
दण्ड एव सहायकः ।
॥८९॥

अव्यवस्थां सृजन् राज्ये
भङ्क्त्वा राज्य-व्यवस्थितिम्
तपः कुर्वन्नपि गत
शम्बूको मम वध्यताम् ।
॥९०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अहनम् यत्, समीचीनम्
तज्जातं राष्ट्रशान्तये
अन्यथाऽऽरम्भयिष्यत्तत-
तपो राष्ट्रेऽव्यवस्थितिम् ।

॥६१॥

यावदेवं व्यक्तिगताः
स्वार्थाधारितवृत्तयः
वर्धन्ते, यान्ति विलयम्
सर्वकल्याणभावनाः ।

॥६२॥

तावदात्मंभरिः कूटः
पण्डितंमन्य उन्मदः
अयं लोकः शासनेन
स्थापनीयो भवेत्पथि ।

॥६३॥

दण्डहीना व्यवस्था तु
तावन्नो संभवेत्तमाम्
यावदाराष्ट्रमाविश्वम्
नोद्गच्छेत्सार्वचेतना ।

॥६४॥

यत्र शीलं च वृत्तं चा-
ऽद्रीयेते धर्मभूतये
यत्र राजा देव इति
स्मर्यते राजभूतये ।

॥६५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बीभत्स्येते यत्र शोष-
सङ्ग्रहौ देशभूतये
यत्र विश्वभ्रातृभावो-
ऽभ्यर्थ्यते विश्वभूतये ।
॥९६॥

स्निह्यन्ति चाऽऽत्मभावेन
यत्र विश्वजना मिथः
हिंसां, द्रोहं विजहति
गृह्णाना विश्वभावनाः ।
॥९७॥

प्रत्याख्याहि न तावत्त्वम्
दण्डे धर्मत्वभावनाम्
न च व्याख्याहि राज्यस्थो
दण्डस्य त्यजनीयताम् ।
॥९८॥

दण्डाभावे सद्य एव
पीड्यन्ते पापिभिः प्रजाः
सान्दृष्टिकमनिष्टं च
राज्यशक्तिं ग्रसिष्यते ।
॥९९॥

एतद् बुद्ध्वा दण्डहस्तः
प्रजाः शाध्यन्यतश्च ताः
उन्मेषय स्वच्छभावैः
स्रष्टुं निर्दण्डयतास्थितिम् ।
॥१००॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सहानुभूतिं, सौहार्दम्
समताम्, न्यायवर्तिताम्
आधेहि स्वप्रजावर्गे
साकल्येन गुणानिमान् ।
॥१०१॥

तत्रैवाऽस्ति हि साफल्यम्
राज्यस्य, येन हि प्रजाः
शान्तिं लभेरन्, मन्येरन्
न राज्यं यमशासनम् ।
॥१०२॥

आध्यात्मिकं नैतिकं चो-
त्थानं राष्ट्रनिवासिनाम्
सार्वत्रिकाद्धि पतनाद्
रक्षणायाऽस्ति साधनम् ।
॥१०३॥

एतेनैव प्रकारेण
शासनेन प्रशिक्षिताः
अस्मद्राज्यप्रजा नैव
जानते दण्डसंहिताम् ।
॥१०४॥

एतादृशः समाजस्य
निर्माणाय महीभुजा
प्रथमं तु स्वयं भाव्यम्
स्वार्थशून्यान्तरात्मना ।
॥१०५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एतत्तत्त्वमजानन्तः
स्वार्थोपहृतबुद्धयः
हास्यपात्राणि सन्त्येके
पृथिव्यां पृथिवीभुजः ।
॥१०६॥

तत् भूमौ भूभुजः सन्ति
सन्तोऽसन्तश्च नैकशः
परिचित्याऽदर्शभूतान्
लक्षणैस्तान् अनुव्रज ।
॥१०७॥

स्वप्रजापालनं कामम्
मन्यन्ते सत्तमा नृपाः
अधमास्तु परस्त्रीणाम्
सङ्गमं कामलम्पटाः
॥१०८॥

जयाय शत्रुषु क्रोधम्
दर्शयन्त्युत्तमा नृपाः
अधमास्तु स्वार्थपूर्त्यै
प्रजानां दमनाय च ।
॥१०९॥

राष्ट्रोत्थानाय ते लोभम्
कुर्वते सत्तमा नृपाः
अधमास्तु सदा वित्ता-
र्जन–सङ्ग्रहकर्मणे! ।
॥११०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदुत्तमानां भूपानाम्
गृहाणाऽदर्शमुत्तमम्
अतिवर्तिष्यसे येन
संख्याम् सामान्यभूभुजाम् ।

॥१११॥

सामाद्युपायैः, सन्ध्यादि–
गुणैः, शक्तित्रयेण च
स्थाने प्रयुक्तैः सबलः
प्रतापहतकण्टकः ।

॥११२॥

विक्रान्तो नतसामन्तो
वात्सल्यावर्जितप्रजः
शत्रुघ्न! धर्मपद्धत्या
कुरु राज्यमतन्द्रितः ।

॥११३॥

एष प्रोक्तो राजधर्मः,
परं चेत्त्वं विशां कृते
स्वं विस्मरेस्तदा भूरि
कर्तव्यं ते स्वतः स्फुरेत्! ।

॥११४॥

परं नवार्जिते राष्ट्रे
कर्माण्येतानि तु त्वया
कार्याणि द्रुतमेव, त्वम्
अन्यथाऽन्तेऽनुतपून्यसि ।

॥११५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राज्यमार्गोऽस्तु निर्बाधः–
स्तदादौ कण्टकायिता
दग्धव्या लावणी सेना
स्वीयवीर्याऽनलार्चिषा ।

॥११६॥

ततः कार्याः स्वविश्वस्ता
एव सैन्याधिकारिणः
अन्यथा स्युर्द्विषत्पक्ष–
शेषात् दुरभिसन्धयः ।

॥११७॥

स्रष्टुं लोकप्रियत्वाय
प्रजास्वात्मीय-भावनाम्
तत्र प्रचलिता रीति–
स्थितीः स्वत्वेन पालय ।

॥११८॥

आसीत् किं किं विकासाय
तत्र लोकाभियाचनम्
चरैर्विज्ञाय तत्पूर्त्यै
स्वं संकल्पं च घोषय ।

॥११९॥

भ्रष्टाचारेण कुख्यातान्
लवणात् प्राप्तरक्षणान्
आयुक्तान् अविलम्ब्यैव
सर्वस्वेन वियोजय ।

॥१२०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राज्यारम्भक्षणादेव
धर्मराष्ट्रजनद्रुहाम्
दण्डनाय यथाशीघ्रम्
दृढां नीतिं च घोषय ।
॥१२१॥

राज्यं कुर्वन्तमेवं त्वाम्
प्रजाः स्वं भाग्यभास्करम्
दुर्भाग्यरात्र्यपगमे
मंस्यन्त उदयं गतम् ।
॥१२२॥

स्वयं तन्मथुराराज्यम्
अपि ते राज्यकौशलात्
गच्छेत् परं मौनहर्षम्
स्वप्रयोजनसिद्धितः
॥१२३॥

कुशासनाऽवग्रहेण
क्लान्तैस्तत्र प्रजाजनैः
मन्येथास्त्वं स्नेहवृष्टया
मेघवज्जीवनप्रदः ।
॥१२४॥

पश्चाच्च क्लेशतपसः
प्राप्तं वरमिवात्मनाम्
इच्छानुरूपं नृपतिम्
त्वां मंस्यन्तेतमां प्रजाः ।
॥१२५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

माथुराः युवकाः सिक्ता
यमुनाजलशीकरैः
गास्यन्ति हृष्टास्ते कीर्तिम्
लोकाभ्युदयकारिणः ।
॥१२६॥

इति चतुर्थः सर्गः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पञ्चमः सर्गः

संपन्नोऽश्वमहायज्ञः
संपन्ना सार्वभौमता
रामस्य वर्तते राज्यम्
सुखशान्तिमयं भुवि ।
॥१॥

गुणैर्वीर्येण च वशी-
भूता भीता महीभुजः
सार्वभौमस्य रामस्या-
देशात्साकेतमाययुः ।
॥२॥

सच्चक्रे भरतः प्रासा-
दोपकण्ठे नृपाज्ञया
प्रत्युद्गमैः सकुशल-
प्रश्नैः प्राप्तान् महीभुजः ।
॥३॥

तदाज्ञया च राजार्है-
र्नानासौविध्यसाधनैः
सज्जितासूयकार्यासु
निन्यिरे ते महीभुजः ।
॥४॥

क्षणं ते तत्र विश्रम्य
वेषै राजपदोचितैः
समवेता ययू राज-
प्रासादमभि भूभुजः ।
॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीराममुपतस्थुस्ते
नत्वा सार्धमुपायनैः
अवध्यशासनं वीरम्
सेनान्यमिव सैनिकाः ।

॥६॥

अमन्यत तदा क्षेम-
प्रश्नो रामस्य सस्मितः
अभयानुग्रहौ शंसन्
सङ्केत इव भूमिपैः ।

॥७॥

आज्ञया तस्य भूपस्य
भूमिपाला अयापयन्
द्वित्राण्यहानि विश्रान्त्यै,
संपर्कायिचनागरैः ।

॥८॥

पर्यायतो लक्ष्मणेन
भरतेन च धीमता
दर्शितान्यधिदृश्यानि
तत्र संददृशुर्नृपाः- ।

॥९॥

नतानुन्नत चारित्र्यान्
सरलान् कूटवेदिनः,
आत्माभिमानिनोऽजस्रम्
परसेवानुरागिणः ।

॥१०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शान्तान् विक्रान्तसिद्धान्तान्
निष्कामान् सपरिग्रहान्
निःस्वार्थान् बृहदुद्देश्यान्
विभिन्नानपि संहतान् ।

॥११॥

राजभक्तान् राष्ट्रभक्तान्
दृष्ट्वा साकेतवासिनः
सौराज्यसाक्षात्कारेण
संत्रा मुमुदिरे नृपाः ।

॥१२॥

समीक्ष्य राजप्रजयो-
र्मिथस्तत्राऽनुरागिताम्
त्यक्त्वाभिमानं राज्यानाम्
ते नृपा जगृहुर्ह्रियम् ।

॥१३॥

सत्कारैस्तत्र राजार्है-
र्वृद्धां ह्रीवेदनाम् नृपाः
सम्राजः स्नेहसौहार्दै-
रन्वभूवन् पराजिताम् ।

॥१४॥

पञ्चमेऽहनि रामोऽस्ति
तत्र सिंहासने, नृपाः
निर्देशस्य प्रतीक्षायां
सन्ति साञ्जलयः स्थिताः ।

॥१५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अस्यामेव स्थितौ तत्र
विश्वराष्ट्रमहीभुजाम्
आदर्शः स महीपालान्
एवं निर्दिष्टवान् नयम्–।

॥१६॥

"आपृथ्वि भवतादेक–
प्रकारं राज्यशासनम्
इति वो निर्दिशन्नस्मि
धर्म्यं स्वं नीतिदर्शनम् ।

॥१७॥

पूर्वं तावद्विश्वमेतत्
किंरूपम् किंरहस्यकम्
एतज्ज्ञात्वैव हि प्राज्ञै–
र्निर्धार्यं नीतिदर्शनम् ।

॥१८॥

चराचरमयं सर्वम्
जगदेतत् परात्मनः
मायायाः प्रबलो मिथ्या–
विलासः प्रतिबुध्यताम् ।

॥१९॥

किं राज्यम्, क इमे भोगाः,
कः प्रासादो, गृहं च किम्
अत्राऽस्ति सकलं वस्तु
क्षणिकं दुःखसङ्कुलम् ।

॥२०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सन्ति केचिन्नृपाः, केचिद्
रङ्काः प्राक्तनकर्मभिः
भवन्ति च नृपा रङ्काः
पुनः स्वैरेव कर्मभिः ।

॥२१॥

तद् गर्वो नैव कर्तव्यः
शक्तौ, जातौ, पदे, कुले
सहसैव हि युस्माकम्
गर्वं कालो हरिष्यति ।

॥२२॥

नृणां जन्मजरामृत्यु-
दुःखकण्टकसंहतेः
भवाटव्या अटाटच्येयम्
न जातवपि समाप्यते ।

॥२३॥

शश्वत् स्वहितमिच्छद्भि-
र्नृभिस्तत् भवचक्रतः
मुक्त्युपायो मार्गणीयो-
ऽस्मिन्नेव क्षणजीविते ।

॥२४॥

स तूपायोऽस्त्येक एव,
जानीध्वं भो महीभुजः !
सशत्रुषड्वर्गजयम्
अशक्तं कर्म केवलम् ।

॥२५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मुमुक्षुणा स्वकर्तृत्वा–
ऽभिमानं च जिहासता
चराचरं जगत्सर्वम्
द्रष्टव्यं हीश्वरात्मकम् ।

॥२६॥

तन्मोक्षकामिभिः कर्म
योगपान्थैर्नृपैरपि
राज्यान्यपि हि कार्याणि
निष्कामेनाऽन्तरात्मना

॥२७॥

त्यक्तैषणेन, सर्वत्र
समेन, न्यायवर्तिना
राज्ञा सञ्चालितम् राज्यम्
जायते निःसपत्नकम् ।

॥२८॥

क्षेत्रे सुखस्य, संपत्तेः,
प्रभुत्वस्य च सर्वदा
मिथः स्वभावात् सर्वेषु
भवत्येव सपत्नता ।

॥२९॥

कः कदा कति शक्तोऽस्ति
प्रभुत्वं, सुखसम्पदः
तस्यैव हस्ते नृत्यन्ति
यस्य यावद् बलं भवेत् ।

॥३०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वार्थपूर्तिमखे शक्ति-
शालिनां भृतिजीविनः
परः सहस्रा हि जना
भवन्त्याहुतयो वृथा ।

॥३१॥

अद्य कस्य, श्वः परस्य
परश्वश्चेतरस्य हि
संक्रामति करे रक्त-
रञ्जिता प्रभुता भुवि ।

॥३२॥

अस्थिरेण प्रभुत्वेन
सशङ्कान् समयान् जनान्
अशान्तिरव्यवस्था च
मुञ्चतो नैव कर्हिचित् ।

॥३३॥

तत् शान्त्यै, स्थितये सृष्टौ
राजा राज्यं च भूतले
मा स्म गातामनन्वर्थौ
जनानां परिहास्यताम् ।

॥३४॥

तत् सर्वासामशान्तीनाम्
अपायानां च कारणम्
एकां स्वार्थधियं त्यक्त्वा
यात निर्दोषतां नृपाः! ।

॥३५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दृढमुन्मूलिते कामे,
हृदः स्वार्थे बहिष्कृते
पुमान् कृतेन कार्येण
नैव केनाऽपि वध्यते ।

॥३६॥

राज्यं प्रजार्थं तद्राजा
प्रजानामेव भूतये
शक्ति, कोषं, बलं सर्वम्
प्रयुञ्जीत गतस्पृहः ।

॥३७॥

नाऽहं पश्यानि, शृणवा-
नि च राज्ये प्रशासनात्
दुष्टेभ्य, आमयेभ्यो वा
दैन्यात् कमपि पीडितम् ।

॥३८॥

तद् यूयं स्वस्व--राज्येषु
गत्वा, त्यक्त्वा फले स्पृहाम्
न्यायेन, कर्तव्यधिया
प्रजाः पालयताऽनिशम् ।

॥३९॥

रक्षणीया हि मर्यादा
सर्वस्थितिषु कर्मसु
मर्यादायाम् पालितायाम्
नैव कश्चिद् विषीदति ।

॥४०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मर्यादयैव ध्रियते
विश्वं, राष्ट्रम्, जना मिथः
तयैव ध्रियतेऽम्भोधिः,
पवनश्चन्द्रभास्करौ ।
॥४१॥

निर्मर्यादो नृपः स्वेच्छा-
चाराद् राज्यप्रजाहितम्
विष्कम्भनाति स्वस्य यशः,
प्रतिष्ठां स्वकुलस्य च ।
॥४२॥

निर्मर्यादाः प्रजाश्च स्वाः
पारम्पर्यसमागताः
प्रहरन्त्येव सकला
राष्ट्रिया मूल्यमान्यताः ।
॥४३॥

निर्मर्यादा उत्पथगाः
प्रजा राष्ट्रं च जात्वपि
संप्राप्नुवन्ति नैश्वर्यम्
सुखं, शान्तिम्, समुन्नतिम् ।
॥४४॥

निर्मर्यादस्थितौ राज्यम्
समाजो व्यक्तयश्च ताः
भवन्त्यान्दोलिताः साङ्गाः
भ्रंशयत्येव व्यवस्थितिः ।
॥४५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत् संस्थाप्य स्वप्रजासु
मर्यादां भो महीभुजः !
विदधध्वं स्वस्वदेशान्
समृद्धान्, स्वावलम्बिनः ।

॥४६॥

उपजीवति सा वर्णा-
श्रमधर्मान् हि केवलम्
विच्छिन्नेष्वेषु सा नैव
स्थातुं शक्नोति जात्वपि ।

॥४७॥

इतो गच्छत राज्येषु
कुरुध्वं च मदीरितम्,
भूमी राजन्वती भूयात्,
क्रियाद्वः कुशलं शिवः" ।

॥४८॥

एवं निर्दिश्य नृपतीन्
भक्त्यैव नतमस्तकान्
विसर्जयामास रामः
स्वस्वदेशनिवृत्तये ।

॥४९॥

विधिस्नाता, दृष्टराम-
तीर्था भक्ता यथा नृपाः
स्वस्वदेशान् न्यवर्तन्त
विशुद्धै रन्तरात्मभिः ।

॥५०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ततः स्थित्वैव साकेत-
व्योम्नि रामरविर्नृपान्
स्वतेजसाऽजागरयत्,
प्रैरयच्च स्वकर्मणे ।
॥५१॥

मार्गो मासोऽस्ति ते भूपा
इव सूर्योऽपि रामतः
निर्दिष्ट इव लोकान् स्वैः
करैस्तिग्मैर्न बाधते ।
॥५२॥

धान्यानां पक्वपीतानाम्
सान्द्राऽसीमा च विस्तृतिः
लोकान् प्रदर्शयत्युर्वीम्
सुवर्णाच्छादितामिव ।
॥५३॥

सरघाभिर्मधुकृते
श्रिता विकसिताश्च ताः
कृषकाशां द्राघयन्त्यः
सन्ति सर्षपभूमयः ।
॥५४॥

सर्वस्याऽर्थे ज्ञानमधु
चिन्वतो, ददतो बुधान्
कात्स्न्र्येनैवा ऽनुकुर्वत्यो
दृश्यन्ते सरघास्तदा ।
॥५५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अस्त्यन्वर्थो मार्ग एष
उदारो बहुधान्यवान्
यच्छत्याराजमारङ्कम्
वर्त्म लक्ष्योचितं शुभम् ।
॥५६॥

रामोऽप्यनेन मार्गेण
संस्मारित इवाऽऽत्मनः
प्रारेभे स्थगितां यात्राम्
लोकसंपर्कहेतुकाम् ।
॥५७॥

सार्वभौमो महीपालो
राम आयास्यतीति ते
नृपा आसन् स्वस्वराज्य-
प्रजा रञ्जयितुं रताः ।
॥५८॥

यत्र प्राप्नोति राज्ये स
रामस्तत्र समुत्सुकाः
प्रत्युद्गच्छन्ति राजानो
नानोपायनपाणयः ।
॥५९॥

हैयङ्गवीनानि केचित्
फलमूलानि केचन
निवेद्य ग्राम्यसंघाश्च
कुर्वते तस्य दर्शनम् ।
॥६०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रजाभिरेव मिलितुम्
तद्यात्राऽऽसीन्न भूमियैः
निर्देशनाप्तये काले
काले साकेतगामिभिः ।

॥६१॥

तन्निषिध्य स्वानुगमे
तत्परान् पृथिवीभुजः
अभ्रमीत् प्रतिराज्यं स
ग्रामाद् ग्रामं जनैर्मिलन् ।

॥६२॥

प्रतिग्रामं स प्रथमम्
शूद्रान् स्नेहेन पृच्छति–
'अशुभं किञ्चिदस्तीति'
वर्णानन्यान् ततः परम्– ।

॥६३॥

''देवमातृकदेशीय–
जनेभ्योऽपि समन्ततः
कच्चित् कृषिर्वितरति
पर्याप्ता धान्यसंपदः?।

॥६४॥

कच्चिदत्राऽस्ति कश्चिद्वः
समाजे उत तद्बहिः
वृत्तिहीनो वासहीनो
नग्नदेहो जनः क्वचित् ?।

॥६५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उताहो दुर्व्यवस्थित्या
कश्चिद् वृद्धो जनः शिशोः,
पिता पुत्रस्य, भर्ता च
पत्न्या मृत्योर्न दूयते ?।
॥६६॥

अकाले निधनं यान्ति
कश्चिद् रुग्णजना अपि ?
राज्यस्य दुर्व्यवस्थित्यो-
पचारेणैव वञ्चिताः? ।
॥६७॥

वर्णाश्रमविधेस्तत्व-
मजानद्भिः कुतर्कतः
कच्चिन्न सृज्यते वर्ग-
द्वेषधीर्लोकतापनी ? ।
॥६८॥

समाजे त्यक्तमर्यादः
शठः कश्चित् समुद्धतः
कच्चिद् भनक्त्यत्र शान्तिम्
जनानतिचरन् गुरून् ।
॥६९॥

राज्यस्य सेवकाद्, राज्याद्,
दुष्टाद्, राजप्रियादपि
कच्चित् पीडाऽस्ति वः? सर्वम्
ब्रूत मां त्यक्तभीतयः ।
॥७०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राजन्येवं पृष्टवति
वात्सल्यावर्जितात्मनाम्
एवं जनानामुद्गारा
आसन् हर्षेण पूरिताः–
॥७१॥

"उदिते त्वयि साम्राज्य–
व्योम्नि सूर्यप्रभे नृप!
कुतोऽस्मान् दुःखकष्टानाम्
अन्धकारो नु पीडयेत्? ।
॥७२॥

तव प्रतापान्नो वर्णा–
श्रमधर्मेषु निष्ठितान्
अस्मान् पीडयितुं शक्तः
कश्चिद् दुष्टोऽथवाऽऽमयः ।
॥७३॥

ग्रामे जनपदे वाऽपि
हिंस्रका वन्यजन्तवः
प्रविश्य नो क्षतिं काञ्चित्
कुर्वते संयता इव ।
॥७४॥

अनावृष्ट्यतिवृष्ट्यौ तु
ताडकान्तकरे त्वयि
नृपे भीत्वेव वीरते
सर्वत्र जनपीडनात् ।
॥७५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न च क्वचिद् विघाताय
क्षत्यै च ग्रामवासिनाम्
पतत्यचिन्तितं वज्रम्
सस्फूर्जथु नभस्तलात् ।
॥७६॥

त्वद्भयादिव गेहादि
न भनक्ति प्रभञ्जनः
न क्षेत्राणि विकर्षन्ति
सीमाउल्लङ्घ्य सिन्धवः ।
॥७७॥

हृष्टेव त्वां पतिं प्राप्य
वीरवर्यं वसुन्धरा
सोसूयते यथाकामम्
धान्यानि च फलानि च ।
॥७८॥

भण्डार ओषधीनां त–
द्धरितं भूषणं भुवः,
पशूनां जीवनाधारो
वनसंपद् विवर्धते ।
॥७९॥

केन्द्रीयतत्त्वम् धर्मस्य
पोषणं वपुषां नृणाम्
साफल्यबीजं च कृषे–
र्वरीवर्धि च गोधनम् ।
॥८०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ददाति भूर्धान्यमद्रि–
र्मणिवयम् रत्नमम्बुधिः
वयं स्मोऽद्यार्थनिश्चिन्ताः
सर्वे निःसङ्ग्रहा अपि ।

॥८१॥

वयं विश्वात्मभावाः स्मः
परमार्थैकदृष्टयः
तज्जात्वपि न वर्गेषु
विद्मो वैषम्यमात्मिकम् ।

॥८२॥

नृपते! त्वत्प्रतापेन
वयं स्मो विगतव्यथाः
माभूदस्मत्कृते चिन्ता
जयोऽस्तु सततं तव !।"

॥८३॥

आकर्ण्य तेषामुद्गारान्
हर्षसन्तोषपूरितान्
रामः प्रोवाच–"तुष्टोऽस्मि
युष्माकं स्थितिदर्शनात् ।

॥८४॥

सर्वेषामेव राज्यानाम्
नृपान् नीतिपुरःसरम्
आदिष्टवानस्मि सम्यक्
सौराज्याय शुभाय वः ।

॥८५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यद्यापतेदत्र किञ्चिद्
विधुरं, संकटं क्वचित्
मां सूचयत तत् सर्वम्
सहसाऽपगमिष्यति ।

॥८६॥

व्यसर्जयद् दाशरथि-
रेवमाश्वासनैः प्रजाः
ताश्चैनं भक्तिपूर्णेन
जयघोषेण तन्वता ।

॥८७॥

एवङ्कारं तदा मत्स्यान्
अङ्गान् बङ्गान् सकेकयान्
गत्वा भ्रमित्वा रामः सः
साकेताय न्यवर्तत ।

॥८८॥

सन्दर्शनार्थं रामस्य
स्थानस्थानेषु वर्त्मनाम्
नरनार्यः पुष्पमाल्यैः
सार्धमासन्नुपस्थिताः ।

॥८९॥

ममत्वस्निग्धया दृष्टया
सस्मितेन मुखेन च
तासां भक्तिं स्वागतयन्
स्पन्दनादेव सोऽगमत् ।

॥९०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एवमेव प्रस्थितस्य
तस्य राजशिरोमणेः
अभवत् संगमो नूत्नैः
स्नातकैः सह वर्त्मनि ।

॥६१॥

ते स्नातकाः सप्रणामम्
फलैर्यज्ञविभूतिभिः
सत्कुर्वन्तो नरपतिम्
प्रावोचन् सशिरोनमम्– ।

॥६२॥

"समावृत्ताः, स्वगुरुतः
प्राप्तानुज्ञा गृहाय च
राजन्नत्रोपस्थिताः स्मः
पथि त्वद्दर्शनेच्छया ।

॥६३॥

त्वद्दर्शनं प्राप्य वयम्
गर्विताः स्मो यतो नृप!
प्रमाणितान्यद्य पूर्व-
जन्मनां सुकृतानि नः ।

॥६४॥

दृष्ट्वा त्वां मूर्तमादर्शम्
निःस्पृहैर्मुनिभिः स्तुतम्
उच्छलन्त्यः सन्ति मुदो
राजन्! नो हृत्सु सांप्रतम् ।

॥६५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न दस्यवो न रक्षांसि!
त्वत्प्रतापान्महीपते !
प्रथमाश्रमचर्या नो
निर्विघ्नं पूर्णतामगात् ।

॥९६॥

सार्वभौमं कार्यभारम्
शिरसा त्वं वहन्नसि
गरिष्ठं पार्थिवं भारम्
अनन्त इव भूमिप !।

॥९७॥

करवाम कथं कं वा
सहयोगं नु तत्कृते ?
पौलस्त्योज्जासनकृते
त्वद्बला इव वानराः ।"

॥९८॥

तान् प्रत्यूचे नरपतिः –
"सहयोगवचःकृते
साधुवादसहस्राणि
भवद्भ्योऽहं समर्पये ।

॥९९॥

सहयोगस्य वाग्भिर्वः
क्षणादुत्साहितोऽस्म्यहम्
प्रतिक्रियां करोत्येव
वचनं हि भवादृशाम् ।

॥१००॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भविष्यदाशाकेन्द्राणां
स्नातकानां भवादृशाम्
राष्ट्रोत्थानं विधित्सूनाम्
अहं वेद्स्यधिमूल्यताम् ।

॥१०१॥

आर्षशिक्षाम्, राष्ट्रभक्तिम्,
सौजन्यं चाऽपि विश्रुताम्
भवतां सहयोगे हि
राष्ट्रं स्वर्गीयतेऽचिरात् ।

॥१०२॥

तस्मात् प्राप्ता गुरुकुले
भवद्भिर्याऽऽर्षभावना
संक्रास्यताम् सैव विष्वक्
गेहे गेहे जने जने ।

॥१०३॥

स्नेहसौहार्द सेवानाम्
चेतनाभिः प्रशोधिता
विश्वशान्तेकसरणिः
सा जयत्यार्षभावना! ।

॥१०४॥

जगदात्यन्तिकहितम्
तत एव भवेदतः
मन्ये– तस्याः सक्रियत्वे
साहाय्यं मे भवेदिति ।

॥१०५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उपेक्षितायां तस्यां स्याद्
गृहं बन्धस्य कारणम्
राज्यं च स्यात् स्वप्रजानाम्
अशान्त्याक्रोशकारणम् ।
॥१०६॥

वैयक्तिकं जीवनं च
भवेत्तस्या अभावतः
भूभारायितमत्यर्थम्
अशान्तम् शून्यचेतनम् ।
॥१०७॥

चेदस्त्यस्मिन् विधौ किञ्चित्-
मत्साहाय्यमपेक्षितम्
निःसंकोचतया ब्रूत
राज्यं तत् पूरयिष्यति ।
॥१०८॥

किञ्च- यूयं यदब्रूत
"त्वद्बला वानरा इति"
: न तद् बाच्यम्, तथोक्ते तु
प्रसज्येत कृतघ्नता ।
॥१०९॥

यतस्ते वानराश्चेन्नो-
ऽदास्यन् युद्धे सहायताम्
तदाऽस्मद्विजयो नैवा-
ऽभविष्यत् समराजिरे" ।
॥११०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्तःसाराम् तस्य गिरम्
श्रुत्वा ते स्नातका नृपम्
प्रत्यवोचन् साञ्जलयः
किञ्चिन्नम्रशिरोधराः–।

॥१११॥

"राजन्! धन्यमहो धन्यम्!
तव कारुण्यमायतम्
यत्त्वं विश्वहितायैवा-
निशं श्राम्यसि, तप्यसे!।

॥११२॥

आत्मनोऽप्यमृतत्वाय
हृत्सु धृत्वैव मन्त्रवत्
त्वन्निर्देशमिमं राजन् !
करिष्यामः क्रियान्वितम्"।

॥११३॥

इत्युक्त्वा नृपमामन्त्र्य
नमस्कृत्य च तं पुनः
प्रतस्थिरे विनीतास्ते
स्नातका हृष्टचेतसः।

॥११४॥

अप्राप्तामूल्यरत्ना
प्रोषिता इव हर्षिताः
नृपोपलब्धनिर्देश-
रत्नास्ते प्राप्नुवन् गृहान्।

॥११५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यथौ रामोऽपि साकेतम्
दर्शनोत्कण्ठितप्रजम्
शान्त्या, समृद्ध्या च कृता–
वासं सुरपुरोपमम् ।
॥११६॥

प्रोष्य प्रत्यागतम् स्वीयम्
पितरं तनया इव
पर्यवृण्वन् प्रजा भूपम्
तदर्थेऽर्पितजीवनम् ।
॥११७॥

स स्तम्भ इव विश्वस्य
प्रकाश इव भूभुजाम्
जीवातुरिव राष्ट्रस्य
पितेवाऽसीच्च तद्विशाम् ।
॥११८॥

एवं भूभृत्तकृजस्य
रामचन्द्रस्य शासतः
गच्छन् आसीत् राज्यकालः
विश्वक्षेमङ्करोऽर्हितः ।
॥११९॥

तस्यां स्थितौ शोचनीये
घटने घटिते उभे–
विलप्रवेशो मैथिल्याः,
लक्ष्मणस्य च निर्गमः ।
॥१२०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्मात् विरक्ति, भूभार-
हाराच्च कृतकृत्यताम्
प्राप्येव त्यक्तुमैहिष्ट
स्वं शरीरं, भुवं च सः।
॥१२१॥

तद्राज्यं पुत्रसात्कृत्य,
निर्दिश्याऽदिश्य मंत्रिणः
भक्तान् हनूमत्प्रमुखान्
कपींश्च सविभीषणान्,–।
॥१२२॥

साऽग्नीन् मुनीन् वसिष्ठादीन्
पुरस्कृत्य गतैषणान्,
प्राणायामविधानेन
सरय्वां देहमुज्झितुम्,–।
॥१२३॥

स्वा अनाथीकृत्य कथा-
शेषतां गन्तुमुद्यतम्
एकाकिनं प्रियं भूपम्
त्यक्तुं नैहिषत प्रजाः।
॥१२४॥

न केवलमयोध्यायाः
प्रजा अपि तु गुह्यकाः
पिपीलिकादयः कीटा
अपि तं राममन्वयुः।
॥१२५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कीदृक् प्रजाप्रियो राजा!
तद्भक्ताः कीदृशः प्रजाः!
भवेदेवं सदा चेत् को
न स्मरेद् दिवमेव गाम्?।
॥१२६॥

राजप्रजामिथः स्नेह–
जातसौराज्यसूतया
विश्वविस्मयकारिण्या–
ऽपूर्वया वार्तयाऽनया ।
॥१२७॥

तदाऽभवद् रामराज्यम्
विश्वस्मिन्नेव हि स्तुतम्
तत्तथा स्तूयतेऽद्यापि
स्तोष्यते च भविष्यति!।
॥१२८॥

इति पञ्चमः सर्गः

जयतु संस्कृतम्

१ - ६२
२ - ५६
३ - ५५
४ १२६
५ - १२८
६५६

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शुद्धिपत्रम्

पृ.	पं.	अशुद्धम्	शुद्धम्
३–	१९	हि हि	हि
८–	९	भवतां	भवताम्
१०–	६	प्राप्त	प्राप्न
१०–	८	पूर्वे	पूर्वे
१४–	३	धर्मः	घर्मः
१५–	८	रम्भदम्	रम्मदम्
१७–	१७	तपोवना	तपोवन
२०–	९	श्वश्रु	श्वश्रू
२४–	७	विस्तारयद्	विस्तारयेद्
३०–	१८	राज्याङ्गेषु	राज्याङ्गेषु
३३–	५	शश्वक	शश्वल्ल
३५–	१२	सोष्पते	सोष्यते
३९–	१५	वतमिहै	वर्तामहै
४१–	३	शुभभ	शुभम
४२–	१५	मुहुर्तो	मुहूर्तो
४३–	१५	शत्रघ्न	शत्रुघ्न
४९–	२	मितम्यचः	मितम्पचः
५१–	१६	क्ष्येत	क्ष्यते
५२–	१४	कार्यं	कार्यं
५९–	१२	बैरिण	बैरिणः
६०–	१९	गत	गतः
६१–	३	त्तत	त्तत्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

६५–	२०	पून्यसि	प्स्यसि
६६–	१	निर्बाधः	निर्बाध
६६–	३	लावणो	लावणी
६६–	१५	सूय	सूप
७२–	१२	निर्धायं	निर्धार्यं
७७–	१८	व्वक्तय	व्यक्तय
७७–	२०	भ्रइय	भ्रश्य
८१–	२	भूमियैः	भूमिपैः
८२–	६	कश्चिद्	कच्चिद्
८२–	१४	कञ्चित्	कच्चित्
८३–	१६	वीरते	बिरते
८४–	१६	बिबर्धते	विवर्धते
८६–	४	गमिष्यति ।	गमिष्यति ।,
८६–	२०	स्पन्द	स्यन्द
८८–	६	करबाम	करवाम
८८–	१५	साधुबाद	साधुवाद
८६–	६	गुरूकुले	गुरुकुले
६१–	१६	हृस्ट	हृष्ट
६२–	१३	त्तकृज	त्तल्लज

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मुद्रक :- महेन्द्र संस्कृत विश्वविद्यालय, छापाखाना
बेलझुण्डी , दाङ
फोन - ०८२-२०-०१९

Jayatu Sanskritam, Kathmandu, Nepal